— (L 4) M1.2 खेचरीव, M3 खचरेव; M4.5 खेचरेव (for खेचरो वि) M1 2 भुवि (for विभु°) — (L 7) T2 M3 विवर्ण° (for विषण्ण°) — After the prior half of line 7, T G2 ins

936* विनाशात्खड्गचर्मणो ।
दन्तैर्दन्तच्छदान्दष्ट्वा चुकोप हृदि दीर्घवत् ।
भवत्विति पुनश्चोक्त्वा

T G2 युद्धापगमनोद्यत (for the posterior half) — (L 9) M1.2 च पुनर्धनु°, M4 (inf lin as in text) सशरं धनु° (for च धनु° पुन°)]

Thereafter S reads adhy 57

26 S om. 26–28 — a) B1 5 Dn D3 7–9 11.12 त

C. 4 1819 B. 4. 57. 41 ततो योधाः परीप्सन्तः शारद्वतममर्षणम् ।
सर्वतः समरे पार्थं शरवर्षैरवाकिरन् ॥ २६
ततो विराटस्य सुतः सव्यमावृत्य वाजिनः ।
यमकं मण्डलं कृत्वा तान्योधान्प्रत्यवारयत् ॥ २७
ततः कृपमुपादाय विरथं ते नरर्षभाः ।
अपाजह्रुर्महावेगाः कुन्तीपुत्राद्धनंजयात् ॥ २८

इति श्रीमहाभारते विराटपर्वणि द्विपञ्चाशोऽध्यायः ॥ ५२ ॥

५३

अर्जुन उवाच ।
यत्रैषा काञ्चनी वेदी प्रदीप्ताग्निशिखोपमा ।
उच्छ्रिता काञ्चने दण्डे पताकाभिरलंकृता ।
तत्र मां वह भद्रं ते द्रोणानीकाय मारिष ॥ १
अश्वाः शोणाः प्रकाशन्ते बृहन्तश्चारुवाहिनः ।
स्निग्धविद्रुमसंकाशास्ताम्रास्याः प्रियदर्शनाः ।
युक्ता रथवरे यस्य सर्वशिक्षाविशारदाः ॥ २
दीर्घबाहुर्महातेजा बलरूपसमन्वितः ।
सर्वलोकेषु विख्यातो भारद्वाजः प्रतापवान् ॥ ३
बुद्ध्या तुल्यो ह्युशनसा बृहस्पतिसमो नये ।

तु, B3 4 तत्र (for ततो) — ^{d}) D6 °घ्रातैर् (for °वर्षैर्) B2 इवाकिरन् (for अवा°). D4 सर्वत. समवाकिरन्

27 S om 27 (cf v. l 26) — ^{b}) B6 Cn ऽसव्य, D4 सर्वान्; C3 सव्य (as in text) — ^{c}) D6 m. 7 (m as in text) 9 दक्षिण, Co 8 यमक (as in text) — ^{d}) D8 °पेधयत् (for °वारयत्)

28 S om. 28 (cf v l 26) — ^{b}) D1 8 रथ तेन (for विरथ ते). D4 महारथाः (for नरर्षभा) — ^{c}) K उपाजह्रुर्; B1 2 5 Dn D2 7 9–12 अपजह्रुर्, B4 D1 4 अपाजग्मुर्, Co as in text. B3 D1–3 महावेगात्, D6 7 महाभागाः (D7 °ग)

Colophon missing in Ś1, S om it — *Sub-parvan* K1 गोग्रह, B Dn D1–3 6 8 10–12 उत्तरगोग्रह — *Adhy name* B1–3 5 Dn1 D6 कृपापयान; B4 D10 कृपभंग°, D4 7–9 कृपपराजय — *Adhy no* (figures, words or both) K1 52, D5 10 50, D6 9 54, D7 49

53

☞ This whole adhy is missing in Ś1 (cf. v. l 4 51 17)

1 Before the ref., N (Ś1 missing, B2 D8 om lines 3–4, D4 om 2–4) ins

937* वैशंपायन उवाच ।
कृपेऽपनीते द्रोणस्तु प्रगृह्य सुमहद्धनु ।
अभ्यद्रवदनाधृष्य शोणाश्व श्वेतवाहनम् ।
स तु रुक्मरथ दृष्ट्वा गुरुमायान्तमन्तिकात् ।
अर्जुनो रथिना श्रेष्ठ उत्तर वाक्यमब्रवीत् ।
[(L 1) D2 8 वि° (for प्र°) B1 Dn D7 9 11 12 सशर, B2 D5 रुचिर; B3–5 D6 विपुल (for सुमहद्) — (L. 2) K1 अनाधृष्य, D7 9 दुराधर्ष (for अनाधृष्य°). — For lines 3–4 of 943* below. — (L. 4) B1 Dn D11. 12 जयता (for रथिना)]
On the other hand, S ins before the ref. a passage given in App I (No 48) — B2 om 1–19. — K D2 4 7–9 S om. the ref — ^{a}) T1 G1. 3 M1–3 5 वेदि (for वेदी) — ^{b}) B5 दीप्ता चाग्निशिखो°, Dn1 ध्वजे यस्य प्रकाशते; S दृश्यतेग्निशिखो° — ^{c}) K काचनैर्दंडै., B1 4 5 Dn D2 4–12 प्रवरे दण्डे, B3 कूबरे दण्डे, D1 3 प्रवरा येन (for काञ्चने दण्डे) — ^{e}) B1 Dn3 D11. 12 अत्र (for तत्र). — ^{f}) B1. 3 Dn1 सारथे, D4 7 9 मानद (for मारिष) S द्रोण यास्यामि सत्तम — After 1, S ins

938* भारद्वाजेन योत्स्येऽहमाचार्येण महात्मना ।

2 B2 om. 2 (cf. v l. 1) — ^{a}) S अमी (for अश्वा) — ^{b}) D4 चारुदर्शना°, D10 साधुवाहिन S तुरगा साधुवाहिन (G2 °हना°) — S transp 2^{cd} and 2^{ef} — ^{c}) B3 4 D4 स्निग्धा वि°, S °वैडूर्यसकाश — ^{d}) D4 10 ताम्राक्षा° K B4 चारुदर्शना S ताम्राक्षः प्रियदर्शन — After 2^{ef} (transposed), S ins

939* यत्तो रथवरे शूरः सर्वशस्त्रभृता वर ।

3 B2 om 3 (cf. v l. 1) — ^{ab}) S पीनदीर्घभुज श्रीमान् (T2 G2 आदित्य इव तेजस्वी) बलवीर्यसमन्वित T1 *repeats* 3^{ab} (with v l as in T2 G2) — ^{cd}) B1 5 Dn D11 12 विक्रांतो, D8 विज्ञातो (for विख्यातो) S सर्वलोक

वेदास्तथैव चत्वारो ब्रह्मचर्यं तथैव च ॥ ४
ससंहाराणि दिव्यानि सर्वाण्यस्त्राणि मारिष ।
धनुर्वेदश्च कात्स्न्येन यस्मिन्नित्यं प्रतिष्ठितः ॥ ५
क्षमा दमश्च सत्यं च आनृशंस्यमथार्जवम् ।
एते चान्ये च बहवो गुणा यस्मिन्द्विजोत्तमे ॥ ६
तेनाहं योद्धुमिच्छामि महाभागेन संयुगे ।
तस्मात्त्वं प्रापयाचार्यं क्षिप्रमुत्तर वाहय ॥ ७
वैशंपायन उवाच ।
अर्जुनेनैवमुक्तस्तु वैराटिर्हेमभूषितान् ।
चोदयामास तानश्वान्भारद्वाजरथं प्रति ॥ ८
तमापतन्तं वेगेन पाण्डवं रथिनां वरम् ।
द्रोणः प्रत्युद्ययौ पार्थं मत्तो मत्तमिव द्विपम् ॥ ९
ततः प्राध्मापयच्छङ्खं भेरीशतनिनादितम् ।
प्रचुक्षुभे बलं सर्वमुद्धूत इव सागरः ॥ १०
अथ शोणान्सदश्वांस्तान्हंसवर्णैर्मनोजवैः ।
मिश्रितान्समरे दृष्ट्वा व्यस्मयन्त रणे जनाः ॥ ११
तौ रथौ वीर्यसंपन्नौ दृष्ट्वा संग्राममूर्धनि ।
आचार्यशिष्यावजितौ कृतविद्यौ मनस्विनौ ॥ १२ C 4 1837 B 4 58.14 K 4.59.23

(M1-2.5 °के)धनुर्धेष्ठः सर्वलोकेषु पूजितः

4 B2 om. 4 (cf. v 1 1) — ^{ab}) S अगिरोदान· सोस्तुल्यो नये बुद्धिमता वर — ^{cd}) D1-3 तयोत्तमं (for तथैव च) S चत्वारो निखिला वेदाः सागोपागा सलक्षणा

5 B2 om. 5 (cf. v 1. 1) — S transp 5^{ab} and 5^{cd}. — ^{ab}) D1.2 सविष्टति हि (for ससहाराणि) K B1 Dn D1 2.11.12 transp दिव्यानि and सर्वाणि B5 सारथे, D4 यान्युत, D6m यान्यपि, D7 9 यानि च, C5 मारिष (as in text) S भारद्वाजे समस्तानि सर्वाण्येतानि साप्रत — ^{d}) S ब्राह्म चास्त्र (T1 G2 M1.5 ब्रह्मास्त्रं च, M2 ब्राह्ममस्त्र) प्रतिष्ठितं — After 5^{cd}, S ins

940* पुराणमितिहास च अर्थविद्या च मानवी ।
[T2 M3 इतिहासश्च (for °स च)]

6 B2 om. 6 (cf. v 1 1) — ^{a}) D7 original धर्मार्जवश्च मत्यं च is cancelled, and क्षमा दया शम सत्य is noted in marg G1.3 दया च (for दमश्च) — ^{b}) D7 orig. दमानृशस्यमेव च is cancelled, and text reading is noted in marg S तेजो मार्दवमार्जव (M1.2 मार्दव हीरचापल) — ^{cd}) B1.4.5 D यस्मिन्नित्य (D1-3 by transp नित्य यस्मिन्) द्विजे गुणाः (D4 प्रतिष्ठिता) (for ^{d}) S प्रतिष्ठिता गुणा यस्मिन्बहवो द्विजसत्तमे — After 6, S ins.

941* यस्याहमिष्टः सततं मम चेष्ट सदा च य ।

7 B2 om. 7 (cf v 1. 1) — ^{ab}) S क्षत्रधर्मं पुरस्कृत्य तेन योत्स्यामि (M3 योत्स्ये ह) सयुगे — ^{c}) B1.5 D11.12 तं, B3 मा (for त्व) D7 9 त (D7 त्व) मा समापयाचार्यं, S आचार्यं प्रापयेदानीं — ^{d}) Dn1 D10 वाहन, D4 मे रथ (for वाहय) S ममोत्तर महारथ
— After 7, S ins

942* अपर पश्य सग्राममद्भुतं मम तस्य च ।

8 B2 om. 8 (cf. v 1 1) T1 M om. the ref — ^{ab}) B1 4.5 D (except D8) °भूषणान् (for °भूषितान्) S उत्तरस्त्वे(M5 °श्चै)वमुक्तोश्वाश्चोदयामास त (G3 स·) प्रति — G2 M3 om 8^{cd} — ^{c}) D1-4 7 9 नोदयामास, D3 प्रेरयामास S (G3 M3 om.) आजगामार्जुनरथो

9 B2 om. 9 (cf. v 1 1) — ^{a}) M1.5 समप्रेक्ष्य (for वेगेन) — ^{b}) S सरथ रणे (for रथिनां वरम्) — ^{c}) K2 प्रत्याययौ, S ·भ्य(G2 ह्य)भ्यद्रवत् (G1.3 °पतत्) (for प्रत्युद्ययौ) D5 यत्तो, D6 क्रुद्धो (for पार्थं) — After 9, S ins

943* स तु रुक्मरथ दृष्ट्वा कौन्तेय समभिद्रुतम् ।
आचार्यं त महाबाहु प्राञ्जलिर्वाक्यमब्रवीत् ।
[Cf. lines 3-4 of 937*]

Thereafter S reads 16-17

10 B2 om. 10 (cf. v 1 1) — ^{a}) D1-5 8 G M3-5 प्रध्मापयच् — ^{b}) K B1 Dn1 D1.3.4.7 9-12 °निनादिन S भेरीपणवनादित — ^{c}) S व्यक्षोभयद् (for प्रचुक्षुभे) — ^{d}) D1.3 S उद्धूतमिव सागर Cv cites उद्धूत इव (as in text) — After 10, S reads 18-19

11 B2 om. 11 (cf v 1 1) — ^{a}) S अश्वाञ्शोणान्महावेगान् — ^{b}) G1 हयान्स्वर्णै D7 9 महाजवै, D10 हयोत्तमै ; S तु (T G2 3 च) वाजिभि — ^{d}) D1.3 8 G1 3 विस्मयत S पृथग् (for रणे) K2 B1.3 4 D (except D5 7 9) नरा ; B5 नृपा (for जना) — After 11, S reads 14, 13, 20

12 B2 om 12 (cf. v 1 1) — ^{a}) S वीरौ (for रथौ) K सूर्यसकाशौ (for वीर्यसपन्नौ) — ^{c}) S रथिनौ (for अजितौ) — ^{d}) S तर° (M4 *inf lin* तप°) (for मन°)

13 B2 om. 13 (cf. v 1. 1) — For sequence of S

C. 4 1838 B 4 58. 15 K. 4 57 80 समाश्लिष्टौ तदान्योन्यं द्रोणपार्थौ महाबलौ ।
दृष्ट्वा प्राकम्पत मुहुर्भरतानां महद्बलम् ॥ १३
हर्षयुक्तस्तथा पार्थः प्रहसन्निव वीर्यवान् ।
रथं रथेन द्रोणस्य समासाद्य महारथः ॥ १४
अभिवाद्य महाबाहुः सान्त्वपूर्वमिदं वचः ।
उवाच श्लक्ष्णया वाचा कौन्तेयः परवीरहा ॥ १५
उषिताः स्म वने वासं प्रतिकर्म चिकीर्षवः ।
कोपं नार्हसि नः कर्तुं सदा समरदुर्जय ॥ १६
अहं तु प्रहृते पूर्वं प्रहरिष्यामि तेऽनघ ।
इति मे वर्तते बुद्धिस्तद्भवान्कर्तुमर्हति ॥ १७

ततोऽस्मै प्राहिणोद्द्रोणः शरानधिकविंशतिम् ।
अप्राप्तांश्चैव तान्पार्थश्चिच्छेद कृतहस्तवत् ॥ १८
ततः शरसहस्रेण रथं पार्थस्य वीर्यवान् ।
अवाकिरत्ततो द्रोणः शीघ्रमस्त्रं विदर्शयन् ॥ १९
एवं प्रववृते युद्धं भारद्वाजकिरीटिनोः ।
समं विमुञ्चतोः संख्ये विशिखान्दीप्ततेजसः ॥ २०
तावुभौ ख्यातकर्माणावुभौ वायुसमौ जवे ।
उभौ दिव्यास्त्रविदुषावुभावुत्तमतेजसौ ।
क्षिपन्तौ शरजालानि मोहयामासतुर्नृपान् ॥ २१
व्यस्मयन्त ततो योधाः सर्वे तत्र समागताः ।

---

cf v. l 11. — a) K समा°; B3 D7 9 (sup lin as in text) तथा°, S (except G1) द्रुता° (for तदा°). — b) K B1 D6 °रथौ (for °बलौ) S द्रोणपाण्डवयोर्ध्वजौ — c) K1 प्रकंपत, Cn प्राकम्पत्, Cs प्राकम्पयत् G1 चमू (for मुहु°) — d) K2 D1 4 7 8 10 G3 M1. 2 5 Cn भारतानां K B8 (by transp) बलं महत्; B4 5 D4 5 महाबलं; S महाचमू (G1 मुहुर्मुहु)

14 B2 om 14 (cf v l 1) For sequence of S, cf v l 11 S transp 14ab and 14cd — a) B (B2 om) Dn D5–7 9 11 12 ततः, D1–4 8 10 G1 2 M तदा (for तथा) S आचार्यं (for पार्थः) — b) S प्रत्यगृह्णत पाण्डवः — c) S पार्थस्य (for द्रोणस्य) — d) S समाह्व- (M1–3 °प)त्य परंतप

15 B2 (cf v l 1) S om 15 — b) B1 Dn2 D6 7 9 11 12 साम° (for सान्त्व°)

16 B2 om 16 (cf v l 1) For sequence of S, cf v l 11 — a) K B (B2 om) Dn D1 3–6 8 10–12 स्मो (for स्म) D5 m उषितोस्मि — b) D5 m 9 स्वप्रसादादरिंदम Cc s cite प्रतिकर्म, Cv प्रतिकर्म चिकीर्षव (as in text) — c) D2 स, D5 m मे (for न) B3 D7 9 (by transp) कर्तुं न (D9 मे) D6 (by transp) कर्तुं नार्हसि कोपं न° — d) K G3 M3 °दुर्मद (K2 M3 °द), D1–3 °दुर्जय; G1 °दुर्दम

17 B2 om 17 (cf v l 1) For sequence of S, cf v l 11 — a) D6 त्वया (for अहं) Dn2 D11 12 प्रहते, D4 प्रहत, D10 प्रकृते; S ताडित; Cc as in text — b) D6 अहं तव (for तेऽनघ) S (except G1 3) प्रहरेयं तवानघ — Ca cites 17ab as in text. — d) S क्षन्तुमर्हति (M2 5 अनुमन्यतां).

18 B2 om 18 (cf v. l 1) For sequence of S, cf v l 11 M om 18–19 — a) B4 D11 12 अस्मिन्; D6 अस्मै; T G तु (for अस्मै) — K D10 (hapl) om 18b–19c. — b) D1 3 °विंशति, D4 G °विंशतीन्; D7 8 °विंशति, Cv as in text. — c) B4 अप्राप्तान् (for अप्राप्तान्) T G एव (for चैव) — d) T1 G3 चिच्छेद लघुहस्तवान्

19 B3 M om 19 (cf v l 1, 18) K D10 om 19abc (cf v l 18) For sequence of S, cf. v l 11 — a) Dn2 T1 G3 शत° (for शर°) — c) D1–3 अवाकिरन् D6 रणे (for ततो) D4 अमेयात्मा (for ततो द्रोण) — d) D10 शीघ्रास्त्रत्व (for शीघ्रमस्त्र) D6 T G1 2 हस्तं; D7 9 शास्त्र (for अस्त्रम्) B3 D1–3 T3 G3 प्रदर्शयन्, Dn1 D10 स्वदर्शयन्, D7 9 उदीरयन् — After 19, N (Ś1 missing) ins

944* रुक्मपुङ्खान्रजतपत्रान्कङ्कपत्रैः शिलाशितैः ।
अवाकिरदमेयात्मा पार्थं सकोपयन्निव ।

20 For sequence of S, cf v l 11 — ab) D4 5 प्रवर्तिते, G1 प्रवर्तते (for प्रववृते) D4 युद्धे (for युद्ध) D2 एव प्रवर्तते युद्धि M तत्तु युद्धं प्रववृते आचार्यस्यार्जुनस्य च — c) S विमुञ्चतो शरानुग्रान् — d) M1–3 विविधान् (for विशिखान्) B3 D5 6 अग्नि° (for दीप्त°)

21 a) S उभौ विश्रुतकर्माणौ — b) D1. 2. 4 7–9 वात° (for वायु°) S उभौ श्रमगतौ जये (M2 3 रणे) — c) B2. 4 D5 6 7m °विद्वांसौ (for °विदुषौ) S उभावतिरथौ लोके (G1 3 वीरौ) — d) D5 6 उभावतुलतेजसौ (D5 °विक्रमौ), S उभौ परपुरंजयौ — e) G तान्शरान्दृष्ट्वा (for शरजालानि) — f) B5 भृशं, D8 नरान् (for नृपान्) T1 G2 M4 5 क्षत्रियान्मोहं आविशत्, T2 G1. 3 M1. 2 क्षत्रिया

शरान्विसृजतोस्तूर्णं साधु साध्विति पूजयन् ॥ २२
द्रोणं हि समरे कोऽन्यो योद्धुमर्हति फल्गुनात् ।
रौद्रः क्षत्रियधर्मोऽयं गुरुणा यदयुध्यत ।
इत्यब्रुवञ्जनास्तत्र संग्रामशिरसि स्थिताः ॥ २३
वीरौ तावपि संरब्धौ संनिकृष्टौ महारथौ ।
छादयेतां शरव्रातैरन्योन्यमपराजितौ ॥ २४
विस्फार्य सुमहच्चापं हेमपृष्ठं दुरासदम् ।
संरब्धोऽथ भरद्वाजः फल्गुनं प्रत्ययुध्यत ॥ २५
स सायकमयैर्जालैरर्जुनस्य रथं प्रति ।
भानुमद्भिः शिलाधौतैर्भानोः प्रच्छादयत्प्रभाम् ॥ २६
पार्थं च स महाबाहुर्महावेगैर्महारथः ।
विव्याध निशितैर्बाणैर्मेघो वृष्ट्येव पर्वतम् ॥ २७
तथैव दिव्यं गाण्डीवं धनुरादाय पाण्डवः ।
शत्रुघ्नं वेगवद्धृष्टो भारसाधनमुत्तमम् ।
विससर्ज शरांश्चित्रान्सुवर्णविकृतान्बहून् ॥ २८
नाशयञ्शरवर्षाणि भारद्वाजस्य वीर्यवान् ।
तूर्णं चापविनिर्मुक्तैस्तदद्भुतमिवाभवत् ॥ २९
स रथेन चरन्पार्थः प्रेक्षणीयो धनंजयः ।

C 4 1857
B 4 53. 33
K. 4 59. 52

मोहमाविशन्, M8 क्षत्रियाणां महामृधे — K2 ins after 21 D2 4 . 7–9, after 23^{ab}

945* अर्जुन वा विना द्रोणात्कोऽन्यो योद्धु रणेऽर्हति ।

22 ^{a}) D1–2. 7–9 विस्मयत (D1. 8 °त) K रणे, B3 तदा (for ततो) S व्य(G1 2 वि)स्मयन्त जना सर्वे — ^{b}) B1 Dn D1–4 8 11 12 ये तत्रासन्, D10 ये च तत्र (for सर्वे तत्र) S द्रोणार्जुनसमागमे — ^{cd}) Dc शीघ्र (for तूर्णं) B Dn D2 4–8 10–12 अपूजयन् (for पूज°) S नराणां सृजता (T2 G2 3 °णां सृजता, G1 शराणामसृजन्) वाक्य श्रूयते सुमहा(T1 स महा, G3 सुमहान्)स्वन

23 ^{a}) D7 द्रोण नु, D10 द्रोणेन (for द्रोण हि) — ^{b}) B1 3 D1–4. 8 इच्छति (for अर्हति) S अथार्जुनात् (for फल्गुनात्) — After 23^{ab}, D2 4 8 7–9 ins 945* — ^{d}) S (except T G2) गुरु च (for गुरुणा) B4 D10 यत्र युध्यत (D10 °ते), D1 3. 4 सह यु(D4 यो)ध्यते (D1 °त), S यदयोधयत् (for यदयुध्यत) — ^{c}) Dn2 D11. 12 इति ब्रुवन्

24 ^{a}) D8 तौ वीरौ (by transp) B2 Dn D. 7 9 अपि; B4 D1–4 6 8 10 अति; D11 12 अधि (for अपि) S तौ समीक्ष्य तु (G1 3 सु) स° — ^{b}) K B2 सनिकृष्य, D7 (m as in text) 2 °निष्टौ, G1 3 सहृष्टौ तौ Dn D11 12 महाभुजौ — ^{c}) D3 छादयतां S शरौघैस्तौ — After 24, S ins

946* सयुगे सचकाशेता कालसूर्याविवोदितौ ।

25 ^{a}) T1 तत्र; T2 G2 त (for सु) G1. 3 M (except M4) स विस्फार्य महच्चाप — ^{b}) T G2 M1. 2 4 5 (inf lin as in text) °नम (for °सदम्) — ^{c}) B1 2 5 Dn D1–6 8 10–12 भा(D4 स)रद्वाजोथ (Dn1 °पि) सक्रुद्ध (B6 D1–2. 6 8 10 सरब्ध), S सरब्धस्तु (T G2 सुसरब्धस्) तथा (T2 G1 M5 तदा, G3 ततो) द्रोण — ^{d}) N (S1 missing) फाल्गुन (K1 फल्गुण) B1 Dn D1–4 7 8 11. 12 प्रत्य(D4 सम)विध्यत S (by transp) प्रत्ययुध्यत फल्गुन (M1 पाडव)

26 ^{d}) S बाणै (M4 sup lin 5 द्रोण) (for भानो) B1 3 4 Dn2 D1. 2. 6–12 T2 M1–3 प्राच्छादयत्, B5 Dn1 D2 Cc आच्छाद° S दिश (M1 2 द्विज) (for प्रभाम्)

27 ^{a}) B1. 2. 5 D (except D6) सु (for स) B2 D3 °बाहो, B4 D7–9 °बाहु S अर्जुनस्तु तदा (T1 G2 तथा, T2 G3 ततो) द्रोण — ^{b}) D1 8 वेगेन च, G1 3 महावेगो (for °वेगै°) — ^{c}) S शतशो (for निशितैर्) — ^{d}) S धाराभिरिव पर्वत — After 27, S ins

947* कालमेव ह्युवोष्णान्वै फल्गुन समवाकिरत् ।
तस्य जाम्बूनदमयैः शितैश्चापच्युतैः शरैः ।
प्रच्छादयद्रथश्रेष्ठ भारद्वाजोऽर्जुनस्य वै ।

[(L. 2) T1 G1 3 चित्रैश् (for शितैश्) — (L 3) T2 G2 प्राच्छादयद् M4 अमेयात्मा (for रथश्रेष्ठ)]

28 ^{a}) D9 गाजीव — ^{b}) T1 G3 M2 4 5 आयम्य, M1 3 उद्यम्य (for आदाय) B2 D5 6 T1 G1. 3 M2 4 5 चार्जुन , B4 6 Dn2 D1–4 7–9 11 12 फाल्गुन , T2 G2 सोर्जुन (for पाण्डव) — ^{c}) B2 4 5 Dn1 D6 7 9 वेगवान् (for °वद्) B2 D6 दृष्ट्वा, B3 4 दृष्ट , D10 कृत्वा, M1 स्पृष्ट्वा, M2 सृष्ट्, M3 सृष्टो, M4 सृष्ट (for हृष्ट°) — After 28^{cd}, S ins

948* शोभते स्म महाबाहुर्गाण्डीव विक्षिपन्धनु ।

— ^{e}) K B2 D10 तीक्ष्णान् (for चित्रान्) S शरांश्च विसृजश्चित्रान्

29 ^{ab}) B2–4 D5 6 शमयञ्, Dn1 D1 2 8 10 नाशयच् D7 शरजालानि S प्र(T G2 प्रा)च्छादयदमेयात्मा भा(T1 G1 M4 5 'भ)रद्वाजरथ प्रति (M4 तदा) — D4 om 29^{c}–30^{b}, D9 om 29^{c}–30^{d} — ^{cd}) B2–4 D5 6 विमुक्तानि

C. 4 1658 B 4 58.23 K 4 59 52 युगपद्दिक्षु सर्वासु सर्वशस्त्राण्यदर्शयत् ॥ ३०
एकच्छायमिवाकाशं बाणैश्चक्रे समन्ततः ।
नादृश्यत तदा द्रोणो नीहारेणेव संवृतः ॥ ३१
तस्याभवत्तदा रूपं संवृतस्य शरोत्तमैः ।
जाज्वल्यमानस्य यथा पर्वतस्येव सर्वतः ॥ ३२
दृष्ट्वा तु पार्थस्य रणे शरैः स्वरथमावृतम् ।
स विस्फार्य धनुश्चित्रं मेघस्तनितनिस्वनम् ॥ ३३
अग्निचक्रोपमं घोरं विकर्षन्परमायुधम् ।
व्यशातयच्छरांस्तांस्तु द्रोणः समितिशोभनः ।
महानभूत्ततः शब्दो वंशानामिव दह्यताम् ॥ ३४
जाम्बूनदमयैः पुङ्खैश्चित्रचापवरातिगैः ।
प्राच्छादयदमेयात्मा दिशः सूर्यस्य च प्रभाम् ॥ ३५
ततः कनकपुङ्खानां शराणां नतपर्वणाम् ।
वियच्चराणां वियति दृश्यन्ते बहुशः प्रजाः ॥ ३६
द्रोणस्य पुङ्खसक्ताश्च प्रभवन्तः शरासनात् ।
एको दीर्घ इवादृश्यदाकाशे संहतः शरः ॥ ३७
एवं तौ स्वर्णविकृतान्विमुञ्चन्तौ महाशरान् ।
आकाशं संवृतं वीरावुल्काभिरिव चक्रतुः ॥ ३८

(for विनिर्मुक्ते). S द्रोणचापविनिर्मुक्तान्बाणैर्बाणानवारयत्

30 D4 om. 30^{ab}, D8 9 om 30 (cf v 1. 29) — ^{a}) S सरथो व्यचरत् (G1 विचरन्) पार्थ· — ^{b}) D5 बभूव ह, S महारथ (for धनजय) — ^{c}) D7 बाणैश्च (for सर्वासु) — ^{d}) B1 2 Dn D11 12 S सर्वतोस्त्राणि, D1 2 सर्वशोस्त्राणि (for सर्वशस्त्राणि) K B4 5 D2 4–6 8 10 दर्शयन्, S अवासृजत् (G1 M5 °किरत्) (for अदर्शयत्) — After 30, S ins

949* आददान शरान्घोरान्संदधान च पाण्डवम् ।
विसृजन्त च कौन्तेय न स्म पश्यन्ति लाघवात् ।

31 ^{b}) B (except B1) D6 M2 4 5 धनजय , D5 7 9 स सर्वश (for समन्तत) — ^{c}) D1–5 7 9 10 G1.3 M4 5 ततो (for तदा) — ^{d}) G1 3 नीहारैरिव S पर्वत. — After 31, S ins

950* मरीचिविकचस्येव राजन्भानुमतो वपु ।
आसीत्पार्थस्य सुमहद्वपु शरशतार्चिप ।
क्षिपत' शरजालानि कौन्तेयस्य महात्मन ।
[(L 2) T G2 3 शरशताचित (G3 °त)]

32 S om 32^{a}–33^{b} — ^{c}) B1 2 4 Dn D11 12 तदा (for यथा) D6 यथा जाज्वल्यमानस्य (by transp) — ^{d}) B4 D6 सर्वश·

33 S om 33^{ab} (cf v 1 32) — ^{a}) D1–4 स दृष्ट्वा तु रणे पार्थं , D6 (by transp) दृष्ट्वा पार्थस्य तु रणे — S reads 33^{cd} after 34^{ab} — ^{c}) D3 विस्फार्य च (for स विस्फार्य) B3 महच्चाप (for धनुश्चित्रं) B1 Dn D1–5 8–12 श्रेष्ठ (for चित्र) S विकृष्य सुमहच् (G2 M1–3 बलवच्) चाप. — ^{d}) N (mostly) °निःस्वन — After 33, S ins ·

951* असकृन्मुञ्चतो बाणान्ददृशु· कुरवो युधि ।
दिक्षु सर्वासु विपुल· शुश्रुवे चरतस्तदा ।
द्रोणस्यापि धनुर्घोषो विद्युत्स्तनितनिस्वन· ।
अभवद्विस्मयकर सैन्यानां भरतर्षभ ।
[(L 2) T1 G1 च रवस्तदा, T2 G2 -थ जनैस्तदा (for चरतस्तदा). M4 5 श्रूयते सुमहास्वन· (for the posterior half)]

34 S transp 34^{ab} and 34^{cd} — ^{a}) D5 m 7 9 अग्निचक्रमिवाविद्धं — ^{b}) B Dn D5 11.12 व्यकर्षत् (for विक°) S म(G1 कुं)डलीकृतकार्मुक (T1 °माहवे, T2 G °मग्रण) — ^{cd}) D6 10 तीक्ष्णान् (for तास्तु) D6 समर° (for समिति°) S तान्विधूय (M1 2 °धून्वन्) शरान्घोरान् (T1 G1 °न्द्रोणो, M4 °न्वेगान्) द्रोणोपि (T1 G1 घोरान्स) समितिंजय — After 34^{cd}, S (which om. 34^{ef}) ins

952* बभासे तिमिर व्योम्नि विधूय सविता यथा ।

— ^{f}) D4 दीर्यतां (for दह्यताम्)

35 ^{ab}) Dn1 corrupt. D1 कुम्भै (for पुङ्खै) B1 Dn2 D10–12 °विनिर्गतै , D2 9 °परातिगै (for °वरातिगै·) S तस्य जाम्बूनदमयैर्दीप्तैरग्निशिखोपमै — ^{c}) G1 3 M प्रच्छादयद् — ^{d}) K1 तदा (for दिश) D4–6 T G2 M2 प्रभा· (for प्रभाम्)

36 ^{c}) S वियद्गतानां चरता (T G2 च तदा) — ^{d}) D10 नश्यंते (for दृश्यन्ते) B D G1.3 M4 5 बहव (for बहुशः) B D G3 M4 व्रजा·, T2 G1 2 M1–3 प्रभा (for प्रजा)

37 ^{ab}) K °सक्तश्च, D4 7 9 °ससक्ता S शरासनात्तु द्रोणस्य प्रभवति स्म सायका — ^{c}) T एक· (for एको). K1 D1 2 5 अदृश्य , K2 अदृश्य-; D4 7 9 आकाशे; D3 अपश्यत्, S अपागात् (T1 अपांगा , G2 अभात) (for अदृश्यत्) — ^{d}) K प्रकाश ; D4 दृश्यते (for आकाशे) S प्रदृश्यंते (M4 दृश्यते स्म) महाशरा. — After 37, S ins

953* आकाशे समदृश्यन्त हंसानामिव पङ्क्तयः ।

38 ^{a}) S सुवर्ण° (for तौ स्वर्ण°) — ^{b}) T1 G2.3

शरास्तयोश्च विबभुः कङ्कबर्हिणवाससः ।
पङ्क्त्यः शरदि खस्थानां हंसानां चरतामिव ॥ ३९
युद्धं समभवत्तत्र सुसंरब्धं महात्मनोः ।
द्रोणपाण्डवयोर्घोरं वृत्रवासवयोरिव ॥ ४०
तौ गजाविव चासाद्य विषाणाग्रैः परस्परम् ।
शरैः पूर्णायतोत्सृष्टैरन्योन्यमभिजघ्नतुः ॥ ४१
तौ व्यवाहरतां शूरौ संरब्धौ रणशोभिनौ ।
उदीरयन्तौ समरे दिव्यान्यस्त्राणि भागशः ॥ ४२
अथ त्वाचार्यमुख्येन शरान्सृष्टाञ्शिलाशितान् ।
न्यवारयच्छितैर्बाणैरर्जुनो जयतां वरः ॥ ४३
दर्शयन्नैन्द्रिरात्मानमुग्रमुग्रपराक्रमः ।
इषुभिस्तूर्णमाकाशं बहुभिश्च समावृणोत् ॥ ४४
जिघांसन्तं नरव्याघ्रमर्जुनं तिग्मतेजसम् ।
आचार्यमुख्यः समरे द्रोणः शस्त्रभृतां वरः ।
अर्जुनेन सहाक्रीडच्छरैः संनतपर्वभिः ॥ ४५
दिव्यान्यस्त्राणि मुञ्चन्तं भारद्वाजं महारणे ।
अस्त्रैरस्त्राणि संवार्य फल्गुनः समयोधयत् ॥ ४६
तयोरासीत्संप्रहारः क्रुद्धयोर्नरसिंहयोः ।
अमर्षिणोस्तदान्योन्यं देवदानवयोरिव ॥ ४७
ऐन्द्रं वायव्यमाग्नेयमस्त्रमस्त्रेण पाण्डवः । C. 4 1675 B. 4 53. 52 K. 4 53. 75

शराञ्शिवान्, T2 M4.5 शरान्बहून्, G1 शिताञ्शरान्; M1-3 बहूञ्शरान् (for महाशरान्) — [c]) D5 आवृतं (for समृत)

39 [a]) S transp शरा and तयो.. K ते, B1-3 Dn D11.12 तु (for च) T2 G2 बहुशः, G1.3 बहव (for विबभु) — [c]) B3 D..6 T2 G2 पङ्क्ति. (for पङ्क्त्य) K रन्धाग्रा, T G2 हंसाना, G1.3 M मत्ताना (for खस्थाना) D1.3 पक्त्य गिरिस्थानां, D4 पक्त्यो हि शरत्काले — [d]) खगाना पक्षिणामिव, S सारसानामिवाम्बरे

40 [a]) B4 तयोर्युद्ध समभवत्, S तत्तु युद्ध पुनर्घोर (G3 M1 महाघोर, M4.5 महद्घोर) — [b]) D5 सरब्ध सु, D6 सुमद्भुद (for सुसरब्धं) D..m.7 9 S तयो सरब्धयोर्महत् (D2m.7 9 °योरभूत) — [c]) S अत्यद्भुतमचिन्त्यं च

41 [a]) K समज्य, B3 D6 सरब्धौ, B4 D5 10 सक्रुद्धौ (for चासाद्य) B2 मत्ताविव सुसंक्रुद्धौ, S महागजाविवा साद्य Cnp cites मत्ताविव

42 S reads 42 after 45 (G2 M3, after 955*) — [a]) K B1.4 D1.6 व्यावहरता, D1.3 4 9 व्यवह°, S व्य(G2 द)दारयता K वीर, B5 Dn1 युद्धे, Dn2 D11 12 युद्ध, T1 G2 वीरौ (for शूरौ) B2.4 D4.6 उभौ व्यच(D5 ग्रह)रतां शूरौ — [b]) S सनद्धौ (for सरब्धौ) — [c]) D1 उदीर्यंता हि, D2 उदीरयेता, D3 उदीरयता S दिव्यानि (for समरे) — [d]) S महा(M1-3 सर्वा-; M6 शस्त्रा)-ण्यस्त्राणि(for दिव्यान्य°) — After 42, S ins

954* पार्थस्तु समरे शूरो दर्शयन्वीर्यमात्मन ।
स महास्त्रैर्महात्मान द्रोण प्राच्छादयच्छरै ।
[(L. 2) M1.3 5 महाबाहुर् (for °त्मान)]

In S (which om. 46[ab]), 954* is followed by 46[cd]

43 [a]) D1.3 om. तु D3 7-9 स तया (for अथ तु) — [b]) D1-3 7 9 शरासनात् (for शिला°) — [c]) Dn2 D5 निवारयच्, S अवारयच् (M2 अवाकिरच्)

44 [a]) B Dn D5 6 11.12 वीक्षमाणानां, D1.3 इन्द्र मात्मान; D2 4.5 m.7-9 रौद्रमात्मान; S ऐन्द्रमात्मान — [b]) B Dn2 D5 11.12 अस्त्रम्, Dn1 शास्त्रम्, D5 शस्त्रम् (m as in text), Cv उग्रम् (as in text) Dn1 D..8 °पराक्रम D3 समन्युश्च पराक्रम — [d]) G1.3 धीमन्तु (for बहुभि°) B3 D5 6 स, T G तु (for च)

45 [b]) K T1 G M3 जयता वर, D7 T2 M1.2 भीम तेजस, M4 5 भीमदर्शन, Ca तिग्म° (as in text) — After 45[ab], S (G2 om. line 2) ins

955* विव्याध निशितैर्द्रोण शरै सनतपर्वभि ।
हृष्ट समभवद्द्रोणो रणशौण्ड प्रतापवान् ।

— S om. 45[cd], G2 M3 om 45[ef] also. — [e]) D1.5 सह क्रीडन्, S (G2 M3 om.) समाक्रीडन् D5 7 9 अवारयत्तदा वीर — S reads 42 after 45 (G2 M3, after 955*)

46 S om. 46[ab] — [a]) K वै द्रोण, Dn D5 11.12 वर्षंत, D7 च द्रोणो (for मुञ्चन्त) D1.3 दिव्यास्त्राणि विमुंचत — [b]) K D7 प्र(D7 वि)मुचत, B D6.10 भारद्वाजो (B1 भवेद्राजा) (for भारद्वाज) Dn D5 11.12 तस्मिन्वै तुमुले रणे — [c]) T G2 सहत्य (for सवार्य) — [d]) B Dn D6 7 10-12 फाल्गुन K1 B3 6 प्रत्य°, K2 प्रति° (for सम°) S पार्थो द्रोणमवारयत्

47 [c]) B3 असृष्यतोस्, D1.3 जयेषिणोस् (for अम र्षिणोस्) S असृष्यमाणयो सख्ये — [d]) T G2 वृत्रवासव°, G1.3 M बलिवासव° — After 47, S ins

956* दर्शयेता महास्त्राणि भारद्वाजार्जुनौ रणे ।

48 [ab]) M1.2 वारुणम् (for वायव्यम्) D3 repeats 48[ab] with v l. विचेरेश शरासनात् (for [b]) — [c]) B1.2 5 Dn D5 11.12 मुक्तमात्रं (for मुक्त मुक्त) B4 D1-3.5 8 च

C. 4 1677 B. 4 58. 52 K. 4. 59 75 द्रोणेन मुक्तं मुक्तं तु ग्रसते स पुनः पुनः ॥ ४८
एवं शूरौ महेष्वासौ विसृजन्तौ शिताञ्शरान् ।
एकच्छायं चक्रतुस्तावाकाशं शरवृष्टिभिः ॥ ४९
ततोऽर्जुनेन मुक्तानां पततां च शरीरिषु ।
पर्वतेष्विव वज्राणां शराणां श्रूयते स्वनः ॥ ५०
ततो नागा रथाश्चैव सादिनश्च विशां पते ।
शोणिताक्ता व्यदृश्यन्त पुष्पिता इव किंशुकाः ॥५१
बाहुभिश्च सकेयूरैर्विचित्रैश्च महारथैः ।
सुवर्णचित्रैः कवचैर्ध्वजैश्च विनिपातितैः ॥ ५२
योधैश्च निहतैस्तत्र पार्थबाणप्रपीडितैः ।
बलमासीत्समुद्भ्रान्तं द्रोणार्जुनसमागमे ॥ ५३
विधुन्वानौ तु तौ वीरौ धनुषी भारसाधने ।
आच्छादयेतामन्योन्यं तितक्षन्तौ रणेषुभिः ॥ ५४
अथान्तरिक्षे नादोऽभूद्द्रोणं तत्र प्रशंसताम् ।
दुष्करं कृतवान्द्रोणो यदर्जुनमयोधयत् ॥ ५५
प्रमाथिनं महावीर्यं दृढमुष्टिं दुरासदम् ।
जेतारं देवदैत्यानां सर्पाणां च महारथम् ॥ ५६
अविश्रमं च शिक्षां च लाघवं दूरपातिताम् ।
पार्थस्य समरे दृष्ट्वा द्रोणस्याभूच्च विस्मयः ॥ ५७
अथ गाण्डीवमुद्यम्य दिव्यं धनुरमर्षणः ।
विचकर्ष रणे पार्थो बाहुभ्यां भरतर्षभ ॥ ५८
तस्य बाणमयं वर्षं शलभानामिवायतम् ।

(for तु) S मुक्त मुक्त द्रोणचापात् — d) B (except B4) D T1 ग्रसति (for °ते)

49 D8 om. 49ab — a) K1 शूर-; B (except B4) D5 (m as in text) भूतौ, D1 वीरौ, D6 भूमौ (for शूरौ) — b) D4–6 सृजतौ नि-; T G2 विसृजेतां B5 D2 8 10 G1 8 शराञ्शितान् (by transp), T G2 M3 शिलाशितान्, M4 शरान्बहून् — c) S अकुर्वा(T2 °र्वी)ता (for चक्रतुस्तौ) — d) S गगन (for आकाश)

50 a) D (except D2 6) T2 G3 तत्र (for ततो) — b) B2–4 D5 6 पतितानां (for पततां च) B1 5 Dn D11 12 चै (for च). — d) G1 वीराणां (for शराणां). D2 7 (m as in text) 9 शुश्रुवे (for श्रूयते)

51 a) T1 G2 M4 5 रथाश्वाश्च, T2 M1–3 रथाश्चाश्वा , G1 रथा ह्यश्वा-; G3 रथानश्वान् (for रथाश्चैव) — b) B1 2 5 Dn D1–3. 5 10–12 वाजिनश्च, D4 (m as in text) समुत्क्रांता (for सादिनश्च) — c) M1 शोणितार्द्रा B3 D4 8 व्यराजत; S च (M4 स्म) दृश्यंते — After 51, B4 D6 ins

957* अशोकानां वनानीव छन्नानि कुसुमैर्नवैः ।
रेजु पार्थशरैस्तत्र तदा सैन्यानि भारत ।

52 b) B3 D1 2 5 6 विचर्मैश्च, S निकृत्तैश्च (for विचित्रैश्च) — d) B2–4 D6 गजैश्च (for ध्वजैश्च) B2–4 D5 6 अपि (for वि)

53 a) D10 यानैश्च, M यौधैश्च (for योधैश्च) — b) S °बाणाभि° — D3 reads 54cd after 53ab — c) B3 सुविग्रस्त, D3 7 9 10 T2 G1 3 सुसभ्रांत; D5 6 सुविभ्रांत, Co सुविद्राण (for समुद्भ्रान्त)

54 a) S विधून्वानौ. M1. 2 कृतौ (for तु तौ) B5 Dn D1–4 7–12 तत्र (for वीरौ) — D2 (hapl) om. from 54b up to the prior half of line 2 of 958* D3 reads 54cd after 53ab — c) D4 10 आच्छादयतौ, S प्रच्छादयेताम् — d) K तितिक्षतौ, B Dn D5 6. 10–12 ततक्षतु-, D1 8 अन्वेक्षतौ, D4 विक्षिपतौ, D7 9 वितक्षतौ; D3 Ca मतक्षंतौ, S दिधक्षतौ B Dn D1 3. 5–12 रथे°, D4 शिते°, S वरे° (for रणे°) — After 54, N (Ś1 missing, D2 om line 1 and prior half of line 2) ins

958* तयो समभवद्युद्धं तुमुल भरतर्षभ ।
द्रोणकौन्तेययोस्तत्र बलिवासवयोरिव ।
अथ पूर्णायतोत्सृष्टै शरैः सनतपर्वभि- ।
व्यदारयेतामन्योन्य प्राणद्यूते प्रवर्तिते ।

[(L 1) B2–4 D1 3–6 लोमहर्षण (for भरत°) — (L 2) K B3 D7 वृत्र°; D8 बल° (for बलि°) — (L. 4) K B3 न्यवार°, D5 अहार°, D8 विदार° (for व्यदार°). K2 B3 5 D2 3 8 10 प्रवर्तते]

55 a) B3 अतरिक्षे च (for अथान्त°) — b) K2 प्रपश्यता (for प्रश°)

56 c) K B2–4 D6 देवमर्त्यानां; D5 G1 3 सर्व(D5 देव)सैन्यानां, T G2 M सर्वदेवानां (for देव°) — d) K नागानां, B1 Dn D7 9 11 12 S सर्वेषां K1 महाहव; K2 °हवे, D7 9 °रमनां (for °रथम्).

57 a) D3 च शिष्याणां, D8 च शिष्यस्य; T G2 सुशिक्षां च — b) K2 हस्तपातितां; S दूरपातन (G1 °घातन) — d) D5 7 10 S आसीच्च, D4 आसीत्सु- (for अभूच्च). — After 57, S ins

959* तत्प्रवृत्त चिरं घोर तयोर्युद्ध महात्मनो ।
अवर्तत महारौद्रं लोकसंक्षोभकारकम् ।

58 a) B D4 6 ततो (for अथ). — d) Some MSS,

न च बाणान्तरे वायुरस्य शक्नोति सर्पितुम् ॥ ५९
अनिशं संदधानस्य शरानुत्सृजतस्तदा ।
ददृशे नान्तरं किंचित्पार्थस्याददतोऽपि च ॥ ६०
तथा शीघ्रास्त्रयुद्धे तु वर्तमाने सुदारुणे ।
शीघ्राच्छीघ्रतरं पार्थः शरानन्यानुदीरयत् ॥ ६१
ततः शतसहस्राणि शराणां नतपर्वणाम् ।
युगपत्प्रापतंस्तत्र द्रोणस्य रथमन्तिकात् ॥ ६२
अवकीर्यमाणे द्रोणे तु शरैर्गाण्डीवधन्वना ।
हाहाकारो महानासीत्सैन्यानां भरतर्षभ ॥ ६३
पाण्डवस्य तु शीघ्रास्त्रं मघवान्समपूजयत् ।
गन्धर्वाप्सरसश्चैव ये च तत्र समागताः ॥ ६४
ततो वृन्देन महता रथानां रथयूथपः ।
आचार्यपुत्रः सहसा पाण्डवं प्रत्यवारयत् ॥ ६५
अश्वत्थामा तु तत्कर्म हृदयेन महात्मनः ।
पूजयामास पार्थस्य कोपं चास्याकरोद्भृशम् ॥ ६६
स मन्युवशमापन्नः पार्थमभ्यद्रवद्रणे ।
किरञ्शरसहस्राणि पर्जन्य इव वृष्टिमान् ॥ ६७
आवृत्य तु महाबाहुर्यतो द्रौणिस्ततो हयान् ।
अन्तरं प्रददौ पार्थो द्रोणस्य व्यपसर्पितुम् ॥ ६८
स तु लब्ध्वान्तरं तूर्णमपायाज्जवनैर्हयैः ।
छिन्नवर्मध्वजः शूरो निकृत्तः परमेषुभिः ॥ ६९ C. 4. 1700 B. 4. 58. 76 K. 4. 59. 97

इति श्रीमहाभारते विराटपर्वणि त्रिपञ्चाशोऽध्यायः ॥ ५३ ॥

भरतर्षभ

59 ^{a}) K तत्र (for तस्य). — ^{b}) B D (except D_{10}) Cn आयन्ति, S असवत् (for आयतम्) — After 59^{ab}, B (except B_1, B_3 marg) Dn $D_{5.7.11.12}$ ins

960* दृष्ट्वा ते विस्मिता सर्वे साधु साध्वित्यपूजयन् ।

— ^{c}) B (except B_2) -प्यस्य, D_6 -प्ययस्य, D_7 S तस्य (for वायु°) — ^{d}) B (except B_2) D_7 S वायु, $D_{1-4.8.10}$ तस्य, D_6 राज्ञ (for अस्य) K शक्नोति स्म प्रसर्पितु

60 ^{a}) S अभीक्ष्ण (for अनिशं) — ^{b}) T_2 G_2 M_{1-3} बाणान् (for शरान्) $B_{4.8}$ $D_{5.6}$ वि-; D_4 सं- (for उत्-). B D T_1 G (except G_1) तथा (D_4 बहून्) — ^{c}) B_4 $D_{11.12}$ ददर्श (for ददृशे) D_{10} transp ददृशे and नान्तरं B D (except D_6) T_1 G_2 M (except M_4) कश्चित् (for किंचित्) — ^{d}) K आददतो, S आपततो

61 ^{a}) K च (for तु) $B_{2.4}$ D_5 अयास्त्र(B_4 तयास्त्र, D_5 अयास)युद्धे घोरे तु, S युद्धे तु कुरुगोग्रास्ते — ^{c}) Dn $D_{11.12}$ शीघ्र (for शीघ्रात्) B $D_{1-6.8}$ °तर° (for °तरं) — ^{d}) K अचोदयत, B (except B_1) D_6 $M_{1.2}$ उदैरयत्

62 ^{a}) K_1 द्रोणस्य (for युगपत्) — ^{d}) K_1 पार्थस्य (for द्रोणस्य) $D_{7.9}$ रथमनिर्घो (for °मन्तिकात्)

63 ^{a}) Hypermetric! K B $D_{6.8}$ आ° (K_1 अ°), $D_{7.9}$ S वि° (for अव°) Dn $D_{11.12}$ कीर्यमाणे तदा द्रोणे, $D_{1-4.8.10}$ द्रोणेव(D_4 वि)कीर्यमाणे तु The text reading अवकीर्यमाणे (hypermetric!) is found only in MS No 472 of the Vishrambag Collection I of the Govt. MSS library at this Institute (= H of Utgikar's Tent. Ed, cf. p 415 there) fully collated but not included in our app crit., it being an inferior misch-codex. — ^{b}) $D_{2.8.7.9}$ T_2 G_3 °धन्विना (G_3 °न°)

64 ^{a}) $D_{7.9}$ तत्पांडवस्य (for पाण्डवस्य तु) B_2 $D_{1.8}$ T G_2 M (except M_8) च (for तु) — ^{b}) N (except D_{1-8}, $Ś_1$ missing) मघवा (for °वान्) B D प्रत्य(D_2 सम)पूजयत् — ^{d}) B_2 वृतान्यत्र, $B_{3.4}$ D_6 तत्र तत्र, B_5 सर्वे तत्र, D_5 नृत्यस्तत्र (for ये च तत्र) — After 64, S ins

961* द्रोण युद्धार्णवे मग्न दृष्ट्वा पुत्र प्रतापवान् ।

65 ^{b}) T $G_{2.3}$ M रथिना (for रथाना) G_1 रथयूथेन यूथप — ^{c}) S सु शौर (for सहसा) — ^{d}) B_1 Dn $D_{11.12}$ T_2 पर्यवारयत्, M_2 सम°

66 ^{a}) K कर्माणि (for तत्कर्म) — ^{d}) G_3 अपि (for अस्य) S तदाकरोत् (for अकरोद्भृशम्)

67 ^{a}) $D_{1-4.8.10}$ सोमर्षवश° — ^{b}) K अभ्या° (for अभ्य°) — ^{c}) K मुचन् (for किरन्)

68 ^{a}) D_8 S आवर्त्य (M_8 आपत्य, M_5 as in text) K $M_{1.3}$ च, T G $M_{2.4.5}$ स (for तु) — ^{b}) M_1 तमभ्ययात्, M_3 ततोभ्ययात् (for ततो हयान्)

69 ^{b}) D_2 अप° (for अपा°) — ^{c}) S °ध्वजरथो (for °ध्वज शूरो) — After 69, S ins

962* पराजिते रणे द्रोणे द्रोणपुत्र समागत ।
सदण्ड इव रक्ताक्ष. कृतान्त समरे स्थित ।

५४

वैशम्पायन उवाच ।
[illegible] ॥ १
[illegible] ॥ २
[illegible] ॥ ३
[illegible] ॥ ४
[illegible] ॥ ५
[illegible] ॥ ६
[illegible] ॥ ७

[illegible]

ततः पार्थो महाबाहुः प्रहस्य स्वनवत्तदा ।
योजयामास नवया मौर्व्या गाण्डीवमोजसा ॥ ८
ततोऽर्धचन्द्रमावृत्य तेन पार्थः समागमत् ।
वारणेनेव मत्तेन मत्तो वारणयूथपः ॥ ९
ततः प्रववृते युद्धं पृथिव्यामेकवीरयोः ।
रणमध्ये द्वयोरेव सुमहल्लोमहर्षणम् ॥ १०
तौ वीरौ कुरवः सर्वे ददृशुर्विस्मयान्विताः ।
युध्यमानौ महात्मानौ यूथपाविव संगतौ ॥ ११
तौ समाजघ्नतुर्वीरावन्योन्यं पुरुषर्षभौ ।
शरैराशीविषाकारैर्ज्वलद्भिरिव पन्नगैः ॥ १२
अक्षय्याविषुधी दिव्यौ पाण्डवस्य महात्मनः ।
तेन पार्थो रणे शूरस्तस्थौ गिरिरिवाचलः ॥ १३
अश्वत्थाम्नः पुनर्बाणाः क्षिप्रमभ्यस्यतो रणे ।
जग्मुः परिक्षयं शीघ्रमभूत्तेनाधिकोऽर्जुनः ॥ १४
ततः कर्णो महच्चापं विकृष्याभ्यधिकं रुषा ।
अवाक्षिपत्ततः शब्दो हाहाकारो महानभूत् ॥ १५
तत्र चक्षुर्दधे पार्थो यत्र विस्फार्यते धनुः ।
ददर्श तत्र राधेयं तस्य कोपोऽत्यवीवृधत् ॥ १६
स रोषवशमापन्नः कर्णमेव जिघांसया ।
अवैक्षत विवृत्ताभ्यां नेत्राभ्यां कुरुपुंगवः ॥ १७
तथा तु विमुखे पार्थे द्रोणपुत्रस्य सायकान् ।
त्वरिताः पुरुषा राजन्नुपाजह्रुः सहस्रशः ॥ १८
उत्सृज्य च महाबाहुर्द्रोणपुत्रं धनंजयः ।
अभिदुद्राव सहसा कर्णमेव सपत्नजित् ॥ १९
तमभिद्रुत्य कौन्तेयः क्रोधसंरक्तलोचनः ।
कामयन्द्वैरथे युद्धमिदं वचनमब्रवीत् ॥ २० C. 4 1922 B. 4. 56. 21

इति श्रीमहाभारते विराटपर्वणि चतुःपञ्चाशोऽध्यायः ॥ ५४ ॥

---

7 ^{a}) B1 Dn D11.12 धनु श्रेष्ठं; D4 धनु कृष्य, D7 9 धनुष्यम्य, Ca.r v धनूंष्यष्टौ (as in text) — ^{b}) B1 Dn D11.12 अपक्राम्य, B2.3 5 D2.6 Cv उपक्रम्य, D1.2 आक्रम्य तु; D4.5 8 10 Cr vp अपक्रम्य, D9 व्युपक्रम्य, T1 व्यतिक्रम्य, G2 व्यपाक्रम्य K1 B1 Dn D11.12 रथर्षभं, B2 3.5 D6.8 रथर्षभ, B4 च वीर्यवान्, D1.2 नरर्षभात्, D7 9 महारथ, D10 M4 नरर्षभ; T G M2 3.5 नरर्षभ ; M1 परंतप — ^{c}) B D पुनरेवा°, S पुनरस्य° (for पुनरस्या°) — ^{d}) T G2 समरे (for हृदये)

8 ^{b}) D7 9 विहस्य, T G2 M3 4 प्रहसन् (for प्रहस्य) — ^{c}) S च तदा (for नवया) — ^{d}) K अंजसा (for ओजसा) — After 8, S (except M2) ins

967* त दृष्ट्वा क्रुद्धमायान्त प्रभिन्नमिव कुञ्जरम् ।
क्रुद्धः समाह्वयामास द्रौणिर्युद्धाय भारत ।

9 M2 om. 9–10 — ^{a}) S (M2 om.) आहृत्य (for आवृत्य) — ^{b}) T G2 3 °गत, G1 M (M2 om.) °हत (for °गमत्) — After 9^{ab}, T G2 ins.

968* चिच्छेद तस्य चाप च सूतं चाश्वाश्रयस्य वै ।
विव्याध निशितैश्चापि शरैराशीविषोपमैः ।
सोऽन्य रथं समास्थाय प्रत्ययाद्द्विपुंगवः ।

— ^{c}) D1–3 6 वारणेनैव

10 M2 om. 10 (cf. v 1. 9) — ^{c}) B3 Dn1 D1–4.10 एवं (for एव) — ^{d}) S (M2 om.) रोम° (for लोम°)

11 ^{ab}) N (except K, Ś1 missing) transp कुरव° and ददृशु° D3 विस्मयं गता (for विस्मयान्विता). — ^{c}) B D (except D7 9) महावीर्यौ (for °त्मानौ) — ^{d}) S द्विरदाविव B2 D5 संवृतौ, B4 5 संयुतौ, D6 सहतौ

12 ^{a}) B3 (m as in text) D6 10 M2–4 समा(M3 °मं)जग्मतुर् — ^{b}) S परस्परमसर्पि(G1.3 °जयपि)णौ — ^{d}) B2 D2.5.7 9 S पावकैः (for पन्नगैः).

13 ^{b}) B5 गाण्डीवं च महद्धनु

14 ^{a}) K1 ततो बाणा, K2 M5 ततो बाणान्, D3 सुपर्वाण° (for पुनर्बाणा) — ^{b}) Dn D11.12 अभ्यस्यतो, Ca अस्य° (as in text) — ^{c}) D (except D5.7–10) तूर्णम् (for शीघ्रम्) — ^{d}) D1.2 transp अधिक and अर्जुन

15 S om. from 15 to end of this adhy K2 om. 15^{a}–16^{b} — ^{a}) K1 B1 Dn2 D9 11.12 महाचाप — ^{b}) K1 Dn D11.12 तथा (for रुषा) — ^{d}) D4 ज्याघातेन; D5 m 9 गोधाघातो; Cv गोधातेन (for हाहाकारो)

16 S om. 16, K2 om. 16^{ab} (cf. v 1. 15) — ^{a}) B1.4 Dn1 D6 8 11 (m as in text) 12 ततश्; B3 D5 10 अथ (for तत्र) K1 D4.10 दधत् (for दधे) — ^{d}) B Dn D1.2 5 9–12 °त्य(B4 °प्य-, D6 °भ्य)वर्धत, D4 °भ्यवर्धयत्, D7 8 °प्य(D3 °भ्य)वीवृधत् (for °ऽत्यवी°) D6

C 4.2313 B. 4.71.25 K 4.76.5

विराट उवाच ।

अहं खल्वपि संग्रामे शत्रूणां वशमागतः ।
मोक्षितो भीमसेनेन गावश्च विजितास्तथा ॥ १८
एतेषां बाहुवीर्येण यदस्माकं जयो मृधे ।
वयं सर्वे सहामात्याः कुन्तीपुत्रं युधिष्ठिरम् ।
प्रसादयामो भद्रं ते सानुजं पाण्डवर्षभम् ॥ १९
यदस्माभिरजानद्भिः किंचिदुक्तो नराधिपः ।
क्षन्तुमर्हति तत्सर्वं धर्मात्मा ह्येष पाण्डवः ॥ २०

वैशंपायन उवाच ।

ततो विराटः परमाभितुष्टः
समेत्य राज्ञा समयं चकार ।
राज्यं च सर्वं विससर्ज तस्मै
सदण्डकोशं सपुरं महात्मा ॥ २१
पाण्डवांश्च ततः सर्वान्मत्स्यराजः प्रतापवान् ।
धनंजयं पुरस्कृत्य दिष्ट्या दिष्ट्येति चाब्रवीत् ॥ २२
समुपाघ्राय मूर्धानं संश्लिष्य च पुनः पुनः ।
युधिष्ठिरं च भीमं च माद्रीपुत्रौ च पाण्डवौ ॥ २३
नातृप्यद्दर्शने तेषां विराटो वाहिनीपतिः ।
संप्रीयमाणो राजानं युधिष्ठिरमथाब्रवीत् ॥ २४
दिष्ट्या भवन्तः संप्राप्ताः सर्वे कुशलिनो वनात् ।
दिष्ट्या च पारितं कृच्छ्रमज्ञातं वै दुरात्मभिः ॥ २५
इदं च राज्यं नः पार्था यच्चान्यद्वसु किंचन ।

---

17 For S cf v l 26 — ^{a}) $B_{2.5}$ Cop आर्या, Co (cf. Cv) अर्च्या (as in text) — ^{b}) K प्राप्ते काले; Cr प्राप्तकाल (as in text) K D_{4} हि (for च) — ^{c}) B_{4} $D_{1.2}$ पूज्यानां D_{10} पूज्यतां चैव पूज्यार्हा॰

18 For S cf v l 26 — ^{d}) B Dn $D_{1.8.10-12}$ गावश्चापि जितास्तथा (D_{8} पराजिता.), $D_{3.4.9}$ गाश्चापि (D_{9} ॰श्चैव) विजितास्तथा

19 For S cf. v. l. 26 — ^{a}) B D (except $D_{5.7.9}$) बाहुवीर्यं तद् (B_{4} तु, D_{1} च) — ^{b}) K यदास्माक, D_{4} यद्यस्माक B_{3} D_{4} जयो रणे, D_{5} रणे जय — ^{c}) $B_{1.2}$ Dn $D_{11.12}$ एव (for वय) — ^{d}) K ॰पुत्रे ॰ष्ठिरे — ^{e}) K_{2} D_{5} प्रसादयाम

20 For S cf v l 26 — ^{b}) K_{2} B_{1} उक्त $B_{3.4}$ $D_{1.5-8}$ नराधिप — ^{c}) B_{4} D_{4-6} अर्हसि — ^{d}) B_{4} $D_{5.6}$ ॰त्मा ह्यसि पांडव

21 For S cf v. l 26 — ^{a}) K_{2} परमाभितृप्त॰, $B_{4.5}$ D_{6} प्रथम (B_{5} ॰म) प्रहृष्ट ; D_{5} परमप्रहृष्ट ; D_{10} प्रथमो भिरष्ट. D_{4} ततो विराटोपि पराभि॰ — ^{b}) K राज्ञ ; B (except B_{4}) D (except $D_{1.3-6.8.10}$) राजा — ^{c}) D_{5} transp सर्वं and तस्मै — ^{d}) B (except B_{5}) $D_{5.6.11.12}$ ॰कोष D_{8} देश च कोश च पुरं महात्मा

23 For S cf v l 26 — ^{a}) B_{4} Dn_{1} $D_{1.3-7.9}$ मूर्ध्न्येतान्, D_{2} तान्मूर्ध्नि D_{8} मूर्ध्नि तान्समुपाघ्राय — ^{b}) B_{4} $D_{1.2}$ समाश्लिष्य; D_{4} सश्लाघ्य च; D_{8} सश्लिषश्च

24 For S cf v l 26 — ^{c}) B (except B_{4}) D (except Dn_{1} D_{3-7}) स (for स॰)

25 For S cf v l 26 K om 25^{cd} — ^{c}) $B_{1-3.5}$ Dn $D_{9.11.12}$ Cop सपालित, B_{4} D_{10} च पालित (for च पारित) Cc cites पारित — ^{d}) $D_{1.2.5}$ अज्ञातैश् B_{4} $D_{1.2.5.6}$ च; D_{7} तैर् (for वै) $D_{3.4}$ दुरासद — After 25, $D_{4.7}$ ins

1143* पृच्छेऽहं कारण किंचिदुच्यता तद्यथातथम् ।
देवानामपि शक्तिवो रूपप्रावर्तकारिणो ।
मन्येऽप्यहं यथा पूर्वं रूप वो नाधुना तथा ।
यदा मनुष्यसामान्यमभूदेतर्हि देववत् ।
रूप कान्ति बल धैर्यं गुणा सर्वेऽप्यनीदृशाः ।
सूर्याग्निरुद्रवज्जाता यूय देवोपमाः क्षणात् ।
युधिष्ठिर उवाच ।
सत्यशौचतपोभिनो गुणैः प्रीताः सुरा ददुः ।
धर्मदुर्गाप्रभृतयो रूपप्रावर्तकृद्गुणान् ।

26 For S see below — ^{a}) B_{4} $D_{2.7}$ transp च and राज्यं B (except B_{4}) Dn D_{9-12} पार्थाय; D_{2-6} च पार्था, D_{7} पार्था मे, D_{8} पार्था वो (for न पार्था) — ^{b}) B D (except $D_{2.5}$) अपि (for वसु) — ^{cd}) B_{5} $D_{1.2.5.6}$ यच्च वक्ष्यामि तत्कार्यं (B_{5} तत्सर्वं) कौंतेये(D_{5} अर्जुने)नाविशकया

☞ For 15–26, S subst

1144* वैशंपायन ।
(15^{ab}) तस्य तद्वचन श्रुत्वा मत्स्यराज प्रतापवान् ।
(22^{ca},23)धनजय परिष्वज्य पाण्डवानथ सर्वश ।
नमस्कृत्वा तु राजान राजप्राज्येऽभिषेचितम् ।
(24^{ab}) नातृप्यद्दर्शने तेषा विराटो वाहिनीपतिः ।
(24^{cd}) सप्रीयमाणो राजान युधिष्ठिरमथाब्रवीत् ।
(25^{ab}) दिष्ट्या भवन्तः सप्राप्ता. सर्वे कुशलिनो वनात् ।
(25^{cd}) दिष्ट्या च चरित कृच्छ्रमज्ञात तैर्दुरात्मभि ।
(26^{ab}) इद राज्य च व. सर्वं यच्चास्ति वसु किंचन ।

C 4. 2313 B. 4. 71. 23 K 4. 70. 5

विराट उवाच ।

अहं खल्वपि संग्रामे शत्रूणां वशमागतः ।
मोक्षितो भीमसेनेन गावश्च विजितास्तथा ॥ १८
एतेषां बाहुवीर्येण यदस्माकं जयो मृधे ।
वयं सर्वे सहामात्याः कुन्तीपुत्रं युधिष्ठिरम् ।
प्रसादयामो भद्रं ते सानुजं पाण्डवर्षभम् ॥ १९
यदस्माभिरजानद्भिः किंचिदुक्तो नराधिपः ।
क्षन्तुमर्हति तत्सर्वं धर्मात्मा ह्येष पाण्डवः ॥ २०

वैशंपायन उवाच ।

ततो विराटः परमाभितुष्टः
समेत्य राज्ञा समयं चकार ।
राज्यं च सर्वं विससर्ज तस्मै
सदण्डकोशं सपुरं महात्मा ॥ २१
पाण्डवांश्च ततः सर्वान्मत्स्यराजः प्रतापवान् ।
धनंजयं पुरस्कृत्य दिष्ट्या दिष्ट्येति चाब्रवीत् ॥ २२
समुपाघ्राय मूर्धानं संश्लिष्य च पुनः पुनः ।
युधिष्ठिरं च भीमं च माद्रीपुत्रौ च पाण्डवौ ॥ २३
नातृप्यद्दर्शने तेषां विराटो वाहिनीपतिः ।
संप्रीयमाणो राजानं युधिष्ठिरमथाब्रवीत् ॥ २४
दिष्ट्या भवन्तः संप्राप्ताः सर्वे कुशलिनो वनात् ।
दिष्ट्या च पारितं कृच्छ्रमज्ञातं वै दुरात्मभिः ॥ २५
इदं च राज्यं नः पार्था यच्चान्यद्वसु किंचन ।

---

17 For S cf v l 26 — a) B2 5 Cop आर्यां, Co (cf. Cv) अर्च्यां (as in text) — b) K प्राप्ते काले, Cr प्राप्तकाल (as in text) K D4 हि (for च) — c) B4 D1 2 पूज्यानां. D10 पूज्यता चैव पूज्यार्हा॰

18 For S cf v. l 26 — d) B Dn D1 8 10–12 गावश्चापि जितास्तथा (D8 पराजिताः), D3 4 9 गाश्चापि (D9 ॰श्चैव) निर्जितास्तथा

19 For S cf. v. l 26 — a) B D (except D5 7. 9) बाहुवीर्यं तद् (B4 तु, D1 च) — b) K यदास्माक; D4 यद्यस्माक B3 D4 जयो रणे, D5 रणे जय॰ — c) B1. 2 Dn D11 12 एव (for वय) — d) K ॰पुत्रे ॰ष्ठिरे. — e) K3 D5 प्रसादयाम.

20 For S cf v l 26 — b) K3 B4 उक्त B3 4 D1. 6–8 नराधिप — c) B1 D4–6 अर्हसि — d) B4 D5 6 ॰त्मा ह्यग्नि पांडव

21 For S cf v. l 26 — a) K3 परमाभितृप्तः, B4 5 D6 प्रथम (B5 ॰म॰) प्रहृष्ट; D5 परमप्रहृष्ट॰, D10 प्रथमोभिरुष्ट. D4 ततो विराटोपि पराभि॰ — b) K राज्ञ, B (except B1) D (except D1 3–6 8 10) राजा — c) D5 transp सर्वं and तस्मै — d) B (except B5) D5 6 11. 12 ॰कोष D8 देश च कोश च पुर महात्मा

23 For S cf v l 26 — a) B4 Dn1 D1 3–7 9 मूर्ध्न्यैतान्; D2 तान्मूर्ध्नि D8 मूर्ध्नि तान्समुपाघ्राय — b) B4 D1 2 समाश्लिष्य; D4 सश्लाघ्य च; D8 सश्लिष्य च

24 For S cf v l. 26 — c) B (except B4) D (except Dn1 D5–7) स (for सं॰)

25 For S cf. v l 26 K om 25cd — c) B1–3. 5 Dn D9 11. 12 Cop सपालित; B4 D10 च पालित (for च पारित) Co cites पारित — d) D1 2 5 अज्ञातेश्च B4 D1. 2 5 6 च, D7 तैर् (for वै) D3. 4 दुरासद — After 25, D4 7 ins

1143* पृच्छेऽहं कारण किंचिदुच्यतां तद्यथातथम् ।
देवानामपि शक्तिर्वो रूपप्रावर्तकारिणी ।
मन्येऽप्यहं यथा पूर्वं रूपं वो नाधुना तथा ।
यदा मनुष्यसामान्यमभूदेतर्हि देववत् ।
रूपं कान्तिं बलं धैर्यं गुणाः सर्वेऽप्यनीदृशाः ।
सूर्याग्निरत्नवज्जाता यूयं देवोपमाः क्षणात् ।
युधिष्ठिर उवाच ।
सत्यशौचतपोभिर्नो गुणैः प्रीताः सुरा ददुः ।
धर्मदुर्गाप्रभृतयो रूपप्रावर्तकृद्गुणान् ।

26 For S see below — a) B4 D2 7 transp च and राज्य B (except B4) Dn D1 9–12 पार्थाय; D3–6 च पार्थां, D7 पार्थां मे, D8 पार्थां वो (for न. पार्थां) — b) B D (except D2 5) अपि (for वसु). — cd) B5 D1 2 5. 6 यच्च वक्ष्यामि तत्कार्यं (B5 तत्सर्वं) कौंतेये (D5 अर्जुने) नाविशंकया

☞ For 15–26, S subst

1144* वैशंपायन. ।
(15ab) तस्य तद्वचनं श्रुत्वा मत्स्यराज प्रतापवान् ।
(22ca, 23) धनंजयं परिष्वज्य पाण्डवानथ सर्वशः ।
नमस्कृत्वा तु राजानं राजराज्येऽभिषेचितम् ।
(24ab) नातृप्यद्दर्शने तेषां विराटो वाहिनीपतिः ।
(24cd) संप्रीयमाणो राजानं युधिष्ठिरमथाब्रवीत् ।
(25ab) दिष्ट्या भवन्तः संप्राप्ताः सर्वे कुशलिनो वनात् ।
(25cd) दिष्ट्या च चरितं कृच्छ्रमज्ञातं तैर्दुरात्मभिः ।
(26ab) इदं राज्यं च वः सर्वं यच्चास्ति वसु किंचन ।

प्रतिगृह्णन्तु तत्सर्वं कौन्तेया अविशङ्कया ॥ २६
उत्तरां प्रतिगृह्णातु सव्यसाची धनंजयः ।
अयं ह्यौपयिको भर्ता तस्याः पुरुषसत्तमः ॥ २७
एवमुक्तो धर्मराजः पार्थमैक्षद्धनंजयम् ।
ईक्षितश्चार्जुनो भ्रात्रा मत्स्यं वचनमब्रवीत् ॥ २८
प्रतिगृह्णाम्यहं राजन्स्नुषां दुहितरं तव ।
युक्तश्चावां हि संबन्धो मत्स्यभारतसत्तमौ ॥ २९ C. 4. 2325 B. 4. 71. 35 K. 4. 77. 6

इति श्रीमहाभारते विराटपर्वणि षट्षष्टितमोऽध्यायः ॥ ६६ ॥

(26^{cd}) अविभक्तमवेक्षता नोत्कण्ठा कर्तुमर्हथ ।
Colophon.
वैशंपायन ।
विराटस्य वचः श्रुत्वा पार्थस्य च महात्मनः ।
(15^{cd}) उत्तरं प्रत्युवाचेदमनिपज्ञो युधिष्ठिरे ।
(16^{ab}) प्रमादेन प्राप्तकाले पाण्डवस्याभिरोचये ।
तेजस्वी बलवान्शूरो राजराजेश्वरः प्रभुः ।
(16^{cd}) {उत्तरां च वरारोहां पार्थस्यानिग्रहदर्शन ।
प्रणिपत्य प्रपद्यामस्त्वां दिष्ट्या भजामहे ।
(19^{cd}) वयं च सर्वे सामात्याः कुन्तीपुत्रं युधिष्ठिरम् ।
प्रसाद्य सुपविष्टानो राजन्किं करवामहे ।
(18^{a},?) राजस्त्वमसि मत्प्राणे गृहीतश्चेन नोक्षित ।
(19^{a},18^{d}) एतेषां बाहुवीर्येण गावश्च विजितास्त्वया ।
कुरवो निर्जिता यस्मात्समानेऽमिततेजसः ।
एष तत्सर्वमकरोत्कुन्तीपुत्रो युधिष्ठिरः ।
(17^{a}) अर्च्याः पूज्याश्च मान्याश्च प्रत्युत्थेयाश्च पाण्डवाः ।
(17^{b}) अर्घ्यार्हाश्चानिवार्याश्च प्राप्तकालं च मे मतम् ।
(17^{cd}) पूजयन्ता पूजनीयाश्च महाभागाश्च पाण्डवाः ।
न ह्येते कुपिता दोषं कुर्युराशीविषोपमाः ।
तस्माच्छीघ्रं प्रपद्याम कुन्तीपुत्रं युधिष्ठिरम् ।
(19^{c}) प्रसादयाम भद्रं ते सह पार्थैर्महारथैः ।
उत्तरामग्रतः कृत्वा शिरसा प्रतामलंकृताम् ।
जानाम्यहमिदं सर्वमेषा तु बलपौरुषम् ।
कुले च जन्म महति फल्गुनस्य च विक्रमम् ।
उत्तरात्पाण्डवाञ्श्रुत्वा विराटो तु समोहितः ।
उत्तरा चापि संप्रेक्ष्य प्राप्तकालमचिन्तयत् ।
ततो विराटः सामात्यः सकलत्रः सबान्धवः ।
उत्तरामग्रतः कृत्वा शिरसा प्राता कृताञ्जलिः ।
भूमौ निपतितस्तूर्णं पाण्डवस्य समीपतः ।
विराट ।
प्रसीदतु महाराजो धर्मपुत्रो युधिष्ठिरः ।
प्रच्छन्नरूपेणस्त्वामनिर्दिष्टस्तृणगर्हितः ।
शिरसाभिप्रपन्नोऽस्मि सपुत्रपरिचारकः ।
(20^{ab}) यदस्माभिरजानद्भिरधिक्षिप्तो महीपतिः ।
अवमत्य कृतं सर्वमयुक्तं प्राकृतो यथा ।

(20^{cd}) क्षन्तुमर्हति तत्सर्वं धर्मज्ञो बन्धुवत्सलः ।
यदिदं मामकं राष्ट्रं पुरं राज्यं च पार्थिव ।
सदण्डकोशं विसृजे तव भृत्योऽस्मि पार्थिव ।
वयं च सर्वे सामात्या भवन्तं शरणं गताः ।
वैशंपायनः ।
तं धर्मराजं पतितं महीतले
सबन्धुवर्गं प्रसमीक्ष्य पार्थिवम् ।
उवाच वाक्यं परलोकदर्शनः
प्रनष्टमन्युर्गतशोकमत्सरः ।
युधिष्ठिर ।
न ते भयं पार्थिव विद्यते मयि
प्रतीतरूपोऽस्म्यनुचिन्त्य मानसम् ।
एवं त्वया सम्यगिहोपपादितं
द्विजैरमात्यैः सहसैश्च पण्डितैः ।
इमां च कन्यां समलंकृतां भृशं
समीक्ष्य तुष्टोऽस्मि नरेन्द्रसत्तम ।
क्षान्तमेतन्महाबाहो यन्मां वदसि पार्थिव ।
न चैव किंचित्पश्यामि विकृतं ते नराधिप ।
वैशंपायन ।
(21^{a}) ततो विराटः परमाभितुष्टः
(21^{b}) समेत्य राज्ञा समयं चकार ।
(21^{c}) राज्यं च सर्वं विससर्ज तस्मै
(21^{d}) सदण्डकोशं सपुरं महात्मा ।
Colophon.
विराट ।
यच्च वक्ष्यामि ते सर्वं मा शङ्केथा युधिष्ठिर ।
इदं सनगरं राष्ट्रं सबलं सबधूजनम् ।
युष्मभ्यं संप्रदास्यामि भोक्ष्याम्युच्छिष्टमेव च ।
अहं वृद्धश्चिरं राजन्भुक्तभोगश्चिरं सुखम् ।
राज्यं दत्त्वा तु युष्मभ्यं प्रव्रजिष्यामि काननम् ।

[(L. 7) G1 प्रचरित; M1.2 विच°, M4 दुश्चरित (for च चरित) — (L. 8) M1.2 अन्यद् (for अस्ति) — (L. 9) Hypermetric! G1.2 M1.2 विभक्तम् (for अवि°) T1 हि (for एतद्) — Colophon *Adhy no* T G M1.4.5 74, M2 73 — (L. 10) T G पार्थिवस्य (for पार्थस्य च).

६७

C. 4 2320
B. 4 72. 1
K. 4 77 7

विराट उवाच ।
किमर्थं पाण्डवश्रेष्ठ भार्यां दुहितरं मम ।
प्रतिग्रहीतुं नेमां त्वं मया दत्तामिहेच्छसि ॥ १
अर्जुन उवाच ।
अन्तःपुरेऽहमुषितः सदा पश्यन्सुतां तव ।
रहस्यं च प्रकाशं च विश्वस्ता पितृवन्मयि ॥ २
प्रियो बहुमतश्चाहं नर्तको गीतकोविदः ।
आचार्यवच्च मां नित्यं मन्यते दुहिता तव ॥ ३
वयःस्थया तया राजन्सह संवत्सरोषितः ।
अतिशङ्का भवेत्स्थाने तव लोकस्य चाभिभो ॥ ४

— (L 11) T2 G2 3 अतिभीतो (for अभिपन्नो). — (L 14) T1 G1 °कर्शन ; G3 °कर्शिन ; M1 2 °घातिन M4 पार्थायामित्रकर्शिने, M5 °स्यामिततेजसः — (L 15) G2 M1 प्रयच्छाम; M5 प्रदास्याम T1 G2 तुष्टा, T2 विष्टा. — (L 16) G1 सर्वे वय च सामात्या ; G2 वय सर्वे सहामात्या , M4 वय सर्वे च सामात्या — (L. 17) G1 3 प्रसाद्याभ्युप° — (L 20) M1 2 विजिता (for निर्जिता) G1 सर्वे (for यस्मात्) — M1 2 om lines 23–24 — (L. 23) G1 आर्यांश्चैवाभि°, M4 5 अध्यांश्चैवाभि° — (L 32) T2 उत्तर — (L 40) T G अज्ञानात् (for अयुक्त) — (L 41) M5 अर्हसि — (L 45) G1 2 स (for त) — (L 47) T2 G2 परलोकदर्शी; G1 3 M5 °दर्शन. — (L. 50) M1 आगमन (for मानसम्) — (L. 52) T1 M1 2 सुहृदैश्च; G1 सवयोध; M4 5 सचिवैश्च (for सहदौश्च). — (L. 55) G1 यथा; G2 M4 5 यन्मा; M2 यद्वा (for यन्मा) — (L 57) T2 परमाभितृप्त.; G2 °भितृप्यन् — Colophon Adhy no T G M1 4 75, M2 5 74 — (L. 61) G1.3 तत् (for ते) — (L 64) G2 अहं वृद्धश्च राजेन्द्र; M1 अह वृद्धश्च राजन तु G1 भुक्तभोग प्रिय सुख, G2 °भोगसुखश्चिर; M2 °भोज्यश्च वै सुख]

27 b) D1 परंतप (for धनंजय) — d) D1 9 10 °सत्तम D8 मत्स्यानां पुरुषर्षभ

28 Before 28, S read वैश°. — a) K1 महाराज; K3 D6 महाराज — b) D6 धनंजयमवैक्षत — c) D7 9 स ईक्षितस्तदा भ्राता; S ईक्षित (T1 G1 3 °तद्र) चार्जुनो ज्ञात्वा — d) S (except M1 2) मात्स्य — After 28, S (M4 hapl om line 2) ins

1145* वय वनान्तरात्प्राप्ता न ते राज्य गृह्णामहे ।
　　कि तु दुर्योधनादीना राज्ञां राज्य गृह्णामहे ।

[(L 1) G1 2 वनान्तरात्सप्राप्ता; G3 वनादिह प्राप्ता, M1 वनान्तरे प्राप्ता]

29 a) B4 D6 चैता, D5 इमां (for राजन्) — b) D4 मम (for तव) — c) T2 G2 हि (for च) Dn1 D3 वां, D8 एव, Co r आवां (as in text). D1 च (for हि) D6 युक्त एवावयोरेव; T1 युक्तोय वा हि स°; G1 युक्तो हि राजन्स°, G3 युक्तो मियादम°, M युक्तरूपो हि स° Ca cites 29c as in text — d) Dn D1-3.5.11.12 मत्स्यभारतयोरपि (D4 °योस्तथा; D5 °योरथ), D6 सद्य कुरुमत्स्ययो , S मा(T1 G2 म)त्स्यभारतवंशयो ; Ca.c r as in text

Colophon (Ś1 M3 missing) T G M1 2 4.5 om. it — Sub-parvan B1 3.4 D1 3 5.6 अभिमन्युविवाह°, D2.7 उत्तराप्रदान (D3 °दापन); D4 परस्परप्रीतिसंपाद ; D8 मत्स्यपाण्डव D9 उत्तरावरप्रदान — Adhy no (figures, words or both) K1 66, D4 65, D8 68, D10 62 — S'loka no. D2 37

67

☞ Ś1 M3 missing (for the entire adhy (cf v 1 1 64 29, 65 11) The MSS are completely ignored here, in the critical apparatus.

2 c) D1 वयस्यया तया राजन्, D2 M1 4 5 रहस्ये च प्रकाशे च; D8 रहश्चैव प्रकाश च — d) K3 B3 Dn D9 11.12 T1 विश्वस्तां, D1 सहस्त

3 a) T2 G2 भूयो (for प्रियो) B (except B1) Dn1 D1 2 9–12 T G1 बहुतमश्च B D (except D2 4 6 7) S (except T2 G2) आस (for अह) — c) D4 S नर्तने (D4 °को) गीतवादिते (D4 T2 G1 3 °वादने)

4 a) S (except T1) वयस्यया Co cites वयःस्था G1.3 अनया (for तया) — b) D3 सोह; D1 5 10 अह (for सह) — c) K धृति, D1 4–6.9 10 Co r अभि-; D3 अधि- (for अति-) D5 6 T1 G1 M तत ; Cr 3 भवेत् (as in text) T1 G1 M1 2 5 अस्थाने; G3 तस्या (for स्थाने) — d) D5 भवेत् (for तव) K D3 चोभयो , B Dn D1 2 5.6 8 10–12 चा विभो (B4 चाशुभो); D7 चाभिभो, S च (M1.2 वा) प्रभो

5 a) Dn1 D6 न मन्त्रये, D1–4 7 9 S Cr आमन्त्रये, Ca c n.3 निमन्त्रये (as in text) B1.3–5 D8 अह त्वा, B2 Dn D11 12 अथ ते; D1.2.6 हि त्वां; D3.4 अह ते; D5 त्वां तु; D10 अप त्वां, S त्वा हि (G1 त्वाय) (for त्वाह)

तस्मान्निमन्त्रये त्वाहं दुहितुः पृथिवीपते ।
शुद्धो जितेन्द्रियो दान्तस्तस्याः शुद्धिः कृता मया ॥ ५
स्नुषाया दुहितुर्वापि पुत्रे चात्मनि वा पुनः ।
अत्र शङ्कां न पश्यामि तेन शुद्धिर्भविष्यति ॥ ६
अभिषङ्गादहं भीतो मिथ्याचारात्परंतप ।
स्नुषार्थमुत्तरां राजन्प्रतिगृह्णामि ते सुताम् ॥ ७
स्वस्रीयो वासुदेवस्य साक्षाद्देवशिशुर्यथा ।
दयितश्चक्रहस्तस्य बाल एवास्त्रकोविदः ॥ ८
अभिमन्युर्महाबाहुः पुत्रो मम विशां पते ।
जामाता तव युक्तो वै भर्ता च दुहितुस्तव ॥ ९

विराट उवाच ।

उपपन्नं कुरुश्रेष्ठे कुन्तीपुत्रे धनंजये ।
य एवं धर्मनित्यश्च जातज्ञानश्च पाण्डवः ॥ १०
यत्कृत्यं मन्यसे पार्थ क्रियतां तदनन्तरम् ।
सर्वे कामाः समृद्धा मे संबन्धी यस्य मेऽर्जुनः ॥ ११

वैशंपायन उवाच ।

एवं ब्रुवति राजेन्द्रे कुन्तीपुत्रो युधिष्ठिरः ।
अन्वजानात्स संयोगं समये मत्स्यपार्थयोः ॥ १२ C. 4. 2267 B. 4. 72. 13 K. 4. 77. 3

Cc cites अह and त्वा D3 तस्मादामन्त्रयेथा — b) D1 Ca दुहित्रा, D7 8 Crp (Dc7) दुहित्रा, Cr दुहितु (as in text) B1.3 दुहित्रर्थे महीपते, B2 Dn D2.4 11.12 दुहिता (D4 °ता) मनुजाधिप, D6 (hypermetric!) दुहित्रर्थं पृथिवीं°, D13 दुहितार नराधिप, S दुहित्रर्थं (G1 पुत्रार्थं मे) विशां पते — c) B (except B4) D1.2.5 6 S Ca शुद्ध, D3 योद्ध, D7 शुद्धा, Cc.5 शुद्ध (as in text) B (except B4) D1.6.3 S जितेंद्रिय, D1.2 यतेंद्रिय, D7 जितेंद्रिया, Cc as in text K1 दक्ष, B1-2.4 D1.2 5 m.3 Ca rp दांत, B4 Cc दांत, D1.6 Cr दांत, S मन्ये, Cc दांत (as in text) — d) K कृति, B1-3 D1.2.4 5 10 G1 M1.2 3 तस्य, Ca.c r तस्या (as in text) K transp कृता and मया

6 a) K3 B1-2.4 G1.3 M1 Cc स्नुषायां, Ca r स्नुषाया (as in text) D1.2 च (for वा) B4 D5 स्नुषाया दुहितरि वा Ca.c r cite दुहितु — b) D4 पुत्रौ, D3 तुल्ये, M1.2.4 पित्रे, Ca.c r पुत्रे (as in text) D4 G1 M1.4 वा (for च) D5 पुत्रेण (for पुत्रे च) D1 मयि, Cr पुन (as in text) — c) B1.4.5 D1.2.4.6 Cr अभिशङ्कां, D4 1 S Ca.c अतिशङ्का — d) D3 तन्त्र, Cc तेन (as in text)

7 a) K1 B1-3.5 Dn D11.12 C3 अभिशापात्, B4 D4(m as in text) 5 अभिशङ्कात् (cf. Cr), Co अतिपगात्, Crp अतिशङ्कात् (cf. Ca), Crp अभिषगात् (as in text) — b) B1-3 Dn D3-12 T G2 मिथ्यापवादात्, Ca.c (or Cr) मिथ्याचारात् (as in text).

8 a) K स्वस्रेयो, Ca.c स्वस्रीयो (as in text) — b) K T2 G2 3 देवसुतो D1 प्रिय (for यथा) D2 साक्षाद्देवसुतोपम. — c) M1 दयितश्च हृतम्रस्य — d) B2 4 सर्वास्त्रेषु च कोविद°, Dn2 D11.12 एष एवास्त्रको°, S बलवानस्त्रको°.

9 a) D5(m as in text) 6 °बाल (for °बाहु) — c) B1 D5 5 असौ, D1.2 अथ (for वै) — d) B1 D3 5 तु, D3 अपि, T1 M अथ, G3 स (for च)

10 a) D1.2.7-9 T1 G3 M3 5 कुरुश्रेष्ठ, D10 सर्वमिद — b) K1 D1.2.9 G1 °पुत्रो, B4 °पुत्र B4 D9 °जय, D1 °जय — c) Dn1 D3 4 6.9 10 य एष, T1 यदेव, T2 G1 2 सदैव, G3 M यदेव (for य एव) D5 धर्मनिष्ठश्च, G2 धर्मनित्य च B4 एष धर्मश्च नित्यश्च, D5 य एव धर्मं निश्चित्य — d) D5 M ज्ञातज्ञेयश्च, D7 T1 ज्ञातज्ञानश्च, T2 G1.2 शास्त्रज्ञान च D5 T2 G1.2 M4 पाडव.

11 a) K D2.4.5 Crp कृत, Cc r कृत्य (as in text) G1 यत्कर्तव्य च ते पार्थ — c) D10 समृध्यतां — d) K D2.4 4 G3 च (for मे) M3 5 भवान् (for ऽर्जुन)

12 a) Dn3 D10 राजेंद्रो, G1 M1.4 राजेंद्र, M3 5 मात्स्ये तु — c) B2 D1.2 3 अन्वजानीत, B4 D6 अनुजानीत, B5 Dn D7 11.12 अन्वशासत्स, S अन्वजानत (G3 °जानाच) (for अन्वजानात्स) C3 cp cite अन्वशासत, Cc अन्वजानात् ॐCa अनुनोत् अनुमतवान्।ॐ B (except B5) D1.2.5 6 S संबंध (for संयोग) — d) S समये कृष्णमात्स्ययो

13 a) T G3 M3 (sup lin) दूतान्, G1 M4 5 युक्त, G2 दूता, M1.2 युक्त (for ततो) D10 transp मित्रेषु and सर्वेषु G1 सत्वर (for सर्वेषु) — b) B1.2.3 T1 वासुदेव K च शीघ्रगान्, B2 4 D5 च पार्थिव, D1 निमन्त्रण, D2 च भारत°, D6 च पाडवा — c) D8 दूताश्च (for कौन्तेयो) — d) D4 विराटश्चैव भारत, D3 कौरव्येपि विराटक — After 13, S ins a passage given in App I (No 60), ending with an addl. colophon (*adhy no* 76) — For a repetition of 13 (with v l.) in S cf. v. l. 14.

C. 4. 2248
B 4. 72. 13
K 4 77 19

ततो मित्रेषु सर्वेषु वासुदेवे च भारत ।
प्रेषयामास कौन्तेयो विराटश्च महीपतिः ॥ १३
ततस्त्रयोदशे वर्षे निवृत्ते पञ्च पाण्डवाः ।
उपप्लव्ये विराटस्य समपद्यन्त सर्वशः ॥ १४
तस्मिन्वसंश्च बीभत्सुरानिनाय जनार्दनम् ।
आनर्तेभ्योऽपि दाशार्हानभिमन्युं च पाण्डवः ॥ १५
काशिराजश्च शैब्यश्च प्रीयमाणौ युधिष्ठिरे ।
अक्षौहिणीभ्यां सहितावागतौ पृथिवीपते ॥ १६
अक्षौहिण्या च तेजस्वी यज्ञसेनो महाबलः ।
द्रौपद्याश्च सुता वीराः शिखण्डी चापराजितः ॥ १७
धृष्टद्युम्नश्च दुर्धर्षः सर्वशस्त्रभृतां वरः ।
समस्ताक्षौहिणीपाला यज्वानो भूरिदक्षिणाः ।
सर्वे शस्त्रास्त्रसंपन्नाः सर्वे शूरास्तनुत्यजः ॥ १८
तानागतानभिप्रेक्ष्य मत्स्यो धर्मभृतां वरः ।
प्रीतोऽभवद्दुहितरं दत्त्वा तामभिमन्यवे ॥ १९
ततः प्रत्युपयातेषु पार्थिवेषु ततस्ततः ।
तत्रागमद्वासुदेवो वनमाली हलायुधः ।
कृतवर्मा च हार्दिक्यो युयुधानश्च सात्यकिः ॥ २०

वैशंपायनः ।
सभामतिक्रम्य च वासवोपमो
निरीक्ष्यमाणो बहुभिः समागतैः ।
स तत्र राजानमभिप्रभाषत
बृहन्नलाहं नरदेव नर्तना ।
वेणीं प्रकुर्यां रुचिरे च कुण्डले
ग्रथे स्रजः प्रावरणानि संहरे ।
स्नानं रचेयं विमृजे च दर्पणं
विशेषकेष्वेव च कौशलं मम ।
स्त्रीवेषु बालेषु जलेषु नर्तने
शिक्षाप्रदानेषु च योग्यता मम ।
करोमि वेणीषु च पुष्पपूरकां-
श्च मे स्त्रियः कर्मणि कौशलाधिका ।
तमब्रवीत्पार्थमुदीक्ष्य विस्मितो
विराटराजोपसृत महायशाः ।

10

After 4 12 16^{ab}, S (G_1 om. lines 1–6) ins

भयाद्युक्ताश्च भीताश्च मल्लाश्चान्ये विचेतसः ।
न्यसुत्वमपरे चैव वान्त्यन्तीव प्रविह्वलाः ।
गा प्रवेष्टुमिवेच्छन्ति खं गन्तुमिव चोद्यताः ।
त्रस्ताः शान्ता विषण्णाङ्गा निःशब्दा विह्वलेक्षणाः ।
विराटराजमल्लास्ते भग्नचित्ता हतप्रभाः ।
मल्लेन्द्रनिहता सर्वे न किंचित्प्रवदन्ति ते ।
मल्ल उद्वीक्ष्य तान्मल्लांस्तान्वाक्यमुवाच ह ।
आगतं मल्लराज मा कृत्स्ने पृथिविमण्डले ।
सिंहव्याघ्रगजैः सार्धं क्रीडन्तं विद्धि भूपते ।
मल्लेन्द्रस्य वचः श्रुत्वा बलदर्पसमन्वितम् ।
विराटो वीक्ष्य तान्मल्लांस्तान्वाक्यमुवाच ह ।
अनेन सह मल्लेन को योद्धुं शक्तिमान्नरः ।
ततो युधिष्ठिरेऽवादीच्छ्रुत्वा मत्स्यपतेर्वचः ।
अस्ति मल्लो महाराज मया दृष्टो युधिष्ठिरे ।
अनेन सह मल्लेन योद्धुं शक्नोति भूपते ।
योऽसौ मल्लो मया दृष्टः पूर्वं यौधिष्ठिरे पुरे ।
सोऽयं मल्लो वसत्येष राजंस्तव महानसे ।
युधिष्ठिरवचः श्रुत्वा व्यक्तमाहेति पार्थिवः ।
सोऽप्यथाहूयतां क्षिप्रं योद्धुं मल्लेन संसदि ।
भीमसेनो विराटेन आहूतश्चोदितस्तदा ।
योद्धुं ततोऽब्रवीद्वाक्यं योद्धुं शक्नोमि भूपते ।
नरेन्द्र ते प्रभावेन श्रिया शक्त्या च शासनात् ।
अनेन सह मल्लेन योद्धुं राजेन्द्र शक्नुयाम् ।
युधिष्ठिरकृतं ज्ञात्वा श्रिया तव विशां पते ।
महादेवस्य भक्त्या च तं मल्लं पातयाम्यहम् ।
चोदितो भीमसेनस्तु मल्लमाहूय मण्डले ।

11

N ins after 4 12 20 T_3, after line 2 of 253*:

ततस्तौ नरशार्दूलौ बाहुयुद्धे समीयतुः ।
वीरौ परमसंहृष्टावन्योन्यजयकाङ्क्षिणौ ।
आसीत्सुभीमः संपातो वज्रपर्वतयोरिव ।
उभौ परमसंहृष्टौ बलेनातिबलावुभौ ।
अन्योन्यस्यान्तरं प्रेप्सू परस्परजयैषिणौ ।
उभौ परमसंहृष्टौ मत्ताविव महागजौ ।
कृतप्रतिकृतैश्चित्रैर्बाहुभिश्च सुसंकटैः ।
संनिपातावधूतैश्च प्रमाथोन्मथनैस्तथा ।
क्षेपणैर्मुष्टिभिश्चैव वराहोद्धूतनिस्वनैः ।
तलैर्वज्रनिपातैश्च प्रसृष्टाभिस्तथैव च ।
शलाकानखपातैश्च पादोद्धूतैश्च दारुणैः ।
जानुभिश्चाश्मनिर्घोषैः शिरोभिश्चावघट्टितैः ।
तद्युद्धमभवद्घोरमशस्त्रं बाहुतेजसा ।

9

(L. 1) G_3 ऽगजेन्द्रतुल्यो — (L. 2) Some MSS °तोऽस्य° — (L. 7) G M_1 उनासुतो, M_2 ऽकुनाशनो (for उमा°) — After line 20, T_1 ins

इत्यर्जुनस्य नरदेवमोजसा
विज्ञाप्य तस्थौ विधिनात्मनः क्रियाः ।

10

(L. 9) T_2 G_2 °मृगे, G_1 M_5 °गणै (for °गजै) — After line 12, T_1 ins

इत्युक्तास्ते विराटेन सर्वे मल्ला विशां पते ।
तूष्णीमासंस्ततो राजा क्रोधाविष्ट उवाच स ।
ग्रामांश्च वेतनान्येषां मल्लानां हारयाम्यहम् ।

— (L. 21) M_{1-3} योद्धुकामो (for योद्धुं ततो) — (L. 24) G_2 °कृतं कृत्वा, M °कृतत्वात् — (L. 26) M (except M_4) त (for तु) — After line 26, T G_2 ins

योद्धुं व्यवसितो वीरो रेणुं संमृज्य हस्तयोः ।

11

(L. 1) $B_{2.5}$ Dn_2 $D_{1-3.9-12}$ T_2 °युद्ध — (L. 2) Om. in D_{1-3}. D_8 बलेनातिबलावुभौ (for the posterior half). — After line 2, $Ś_1$ K ins:

तद्युद्धमभवद्घोरं तयोस्तत्र समागमे ।

— (L. 3) Om. in D_{1-3}. Dn_2 $D_{11.12}$ T_2 भीमश्च (for सुभीम) — (L. 4) Om. in K_2 $D_{5.7}$ $D_{1.2}$ वीरौ (for उभौ) — (L. 5) Om. in K_2 $D_{5.7}$ $Ś_1$ Dn_1 $D_{1.2}$ D_4

हारालङ्कारयोग्यौ तु स्तनौ चोनौ सुशोभनौ ।
सुजातौ सहितौ लक्ष्म्या पीनौ वृत्तौ निरन्तरौ ।
कुड्मलाम्बुरुहाकारौ तव सुभ्रु पयोधरौ ।
कामप्रतोदाविव मा तुदतश्चारुहासिनि ।
वलीविभङ्गचतुरं स्तनभारविनामितम् ।
कराग्रसंमितं मध्यं तवेदं तनुमध्यमे ।
दृष्ट्वैव चारु जघनं सरित्पुलिनसंनिभम् ।
कामव्याधिरसाध्यो मामप्याक्रामति भामिनि ।
जज्वाल चाग्निमदनो दावाग्निरिव निर्दयः ।
त्वत्संगमाभिसंकल्पविवृद्धो मे दहत्ययम् ।
आत्मप्रदानवर्षेण संगमाम्भोधरेण च ।
शमयस्व वरारोहे ज्वलन्तं मन्मथानलम् ।
मच्चित्तोन्मादनकरा मन्मथस्य शरोत्कराः ।
त्वत्संगमाशानिशितास्तीव्राः शशिनिभानने ।
मह्यं विदार्य हृदयमिदं निर्दयवेगिता ।
प्रविष्टा ह्यसितापाङ्गि प्रचण्डाश्चण्डदारुणाः ।
अत्युन्मादसमारम्भाः प्रीत्युन्मादकरा मम ।
आत्मप्रदानसंभोगैर्मामुद्धर्तुमिहार्हसि ।
चित्रमाल्याम्बरधरा सर्वाभरणभूषिता ।
कामं प्रकामं सेव त्वं मया सह विलासिनि ।
नार्हसीहासुखं वस्तुं सुखार्हा सुखवर्जिता ।
प्राप्नुह्यनुत्तमं सौख्यं मत्तस्त्वं मत्तगामिनि ।
स्वादून्यमृतकल्पानि पेयानि विविधानि च ।
पिबमाना मनोज्ञानि रममाणा यथासुखम् ।
भोगोपचारान्विविधान्सौभाग्यं चाप्यनुत्तमम् ।
पानं पिब महाभागे भोगैश्चानुत्तमैः शुभैः ।

13

After 267* (cf. v. l. 4. 13. 12), S ins.

देव प्रपद्ये शरणं वृषध्वज
त्रिलोचन दक्षमखप्रणाशनम् ।
हर भर्व स्थाणुमुमापतिं प्रभुं

K2 लक्ष्म्या चोन्नतमायुत, D7 लक्ष्म्या अनुत्तमाकृति — (L. 17) K3 B5 D5 °योग्यौ (D5 °योग्यौ) ते, B2–4 D5 °योग्यौ (B4 °ग्ये), D7 2 °योग्यानि, D12 °सुयोग्यौ K3 स्तनौ पीनोन्नतौ शुभे, B2.3 D5 उभौ चारुस्तनौ शुभौ, B4 समावेतौ स्तनौ शुभौ, B5 समावेतौ समायुतौ, D2 समावेतौ स्तनौ शुभे, D7 2 पीनोन्नतमुखस्तनौ, D10 उभौ स्तनौ समौ शुभौ — (L. 18) B3 सुवृत्तौ (for सहितौ) K3 समसुजातौ सहितौ, D5 समौ सुजातौ लक्ष्म्या च, D7.2 पीनौ सुजातौ सुघनौ C3 cites सुजातौ K3 लक्ष्मीर्मेतौ, B3 पीनावृत्ति-, D7 2 सुपीनौ (for पीनौ वृत्तौ) Cc cites वृत्तौ — (L. 19) D12 कुड्मलाम्बुजसंकाशौ (cf. C3) Cr पयोधरौ (=पयोधरौ?) — (L. 20) Om. in D7 K3 कामप्रतोदगाविनौ; D3 कामप्रतोदाविनौ Cc cites प्रतोदाविव K3 स्तनौ ते (for तुदत) — (L. 21) K3 D7 2 त्रिवलीभङ्ग°, D10 वलीविभङ्ग° Cc analyses वलीविभङ्ग° K3 आवर्ते नाभि मध्य — (L. 24) B3m.4 अयं मा, D7 2 असह्यो, Cc अन्वाधो (as above) K3 B5 अयं, B3m.4 च (for माम्) K3 मन्येऽहमिति आधर्षे, B2.4 वाधतेऽतीव भामिनि — (L. 25) B D5 6 10 ज्वालावानय मदनो, D3 जज्वाल वाय मदनो, D7 2 सदावदग्निः वन B3 मां दहेत्, D5 7 2 निर्दहन् — (L. 26) Cr cites सुकल्प B2.4.5 Dn1 D5 मां (for मे) B1.3 त्वत्संगमाशा(B3m °भि)संकल्पसिद्ध्याभिदहत्यय — (L. 28) B2.4 D7 2 शमय त्व (for °यस्व) — (L. 29) K3 मदोत्करा, B3 D6–7.2 शरोत्तमा — (L. 30) Dn D11.12 T2 त्वत्संगमेन शमिता, D7 2 त्वत्संगमनिर्दिता Cr cites निशिता K3 शरा, B (except B5) D2.5 6.10 Cr पीना, D7 2 मह्य (for तीव्रा) D7 2 शशिवदनने — (L. 31) Om. in Dn D11.12 T2 D7 2 सद्यावदार्य — (L. 32) B3 D2.6.7 2.10 च (for हि) D7 2 अनवद्याङ्गि (for असिता°) B2.4 D3 7 2.10 च सुदारुणा — (L. 33) K3 त्वं प्राप्य मनारभ B3(m as above) रत्युन्मा°, B4 रत्युन्मादकरारमा, D6 प्रत्युन्मादकरारते, D7 2 मृत्युप्रायसमा° K3 प्रत्युत्साहकर, B2 3m Cr सात्त्विकारकरा°, B4 प्रत्युत्सादकरा°, D3.5 प्रीत्युत्पादकरा°, D6 प्रत्युन्मादकरा, D7 2 मृत्यून्माद° Cc cites कारा B3 Cr तव (for मम) — (L. 34) K3 B2–4 D2 6.10 °भोगाद् K3 D7 2 मा समुद्धर्तुमर्हसि, B2–4 D3.10 मामुद्धर्तुं त्वमर्हसि, D6 मां त्वमुद्धर्तुमर्हसि — (L. 35) K3 विचित्रपुष्पाभरणा, D7 दिव्यमाल्या°. D7 2 दिव्या° (for सवा°) — (L. 36) K3 मा दत्त्व, B3m D2.7 2 सेवस्व (for सेव त्वं) — (L. 37) K3 कर्तुं (for वस्तुं) D7 2 तथैवार्हा सुखं वस्तु — (L. 38) Dn1 D11.12 T2 प्राप्नुहि, D10 प्राप्य च, Cn.r (commenting on line 41) प्राप्नुहि (as above) K3 प्राप्नुया उत्तम सौ° K3 मदगामिनि, B2–4 D6 गजगा°, B3m D5 (after corr.) r मत्तकाशिनि — (L. 39) K3 B (except B1) D5–7 2.10 पानानि (for पेयानि) — (L. 40) K3 पिब त्वं हि (for पिब°), and रमस्व (for रममाणा) — (L. 41) K3 भोगान्मत्तस्त्व विपुलान् D7 2 यशस्विनि (for चाप्य°) — After line 41, K3 (which om. line 42) ins

निर्योत्स्य वरारोहे भूपद्रविणसंपदान् !,

repeating thereafter 4. 14. 1[ab] — (L. 42) B2 4 6 D3 10 Ca.c(?) r पाहि; Crp (Cat.) पिब (as above) D7 10 मानयस्व वरारोहे B3–5 D3.5–7 2 10 om. च

13

(L. 3) T1 G1 शिव, G3 M3 विभु (for प्रभु) — (L. 10) G3 व्यालप्रियतत्त्व, M1.4.5 व्यालप्रिय° M मेदिनी (for भामिनि) — (L. 12) G3 M4.5 °प्रसरोमि — (L. 17) M

गन्धर्वाः किल पञ्चैना रक्षन्ति रमयन्ति च।
एवमेषा ममाचष्ट तथा प्रथमसंगमे।
तथैव गजनासोरु सत्यमाह ममान्तिके।
ते हि क्रुद्धा महात्मानो नाशयेयुर्हि जीवितम्।
राजा चैव समीक्ष्यैनां समोह गतवानिह।
मया च सत्यवचनैरनुनीतो महीपतिः।
सोऽप्येनामनिन्दां दृष्ट्वा मनसैवाभ्यनन्दत।
भयाद्गन्धर्वमुख्यानां जीवितस्योपघातिनाम्।
मनसापि ततस्त्वेनां न चिन्तयति पार्थिव।
ते हि क्रुद्धा महात्मानो गरुडानिलतेजस।
दहेयुरपि लोकांस्त्रीन्युगान्तेष्विव भास्कराः।
सैरन्ध्र्या ह्येतदाख्यातं मम तेषां महद्बलम्।
तत्र चाहमिदं गुह्यं स्नेहादाख्यामि बन्धुवत्।
मा गमिष्यसि वै कृच्छ्रां गतिं परमदुर्गमाम्।
बलिनस्ते रुजं कुर्युः कुलस्य च जनस्य च।
तस्मादास्थां मनः कर्तुं यदि प्राणाः प्रियास्तव।
मा चिन्तयेथा मा गास्त्वं मत्प्रियं च यदीच्छसि।
एवमुक्तस्तु दुष्टात्मा भगिन्यां कीचकोऽब्रवीत्।
गन्धर्वाणां शतं वापि सहस्रमयुतानि वा।
अहमेको हनिष्यामि गन्धर्वान्पञ्च किं पुनः।
न च त्वमभिजानीषे स्त्रीणां गुह्यमनुत्तमम्।
पुत्रं वा किल पौत्रं वा भ्रातरं वा मनस्विनी।
रहसीह नरं दृष्ट्वा नानागन्धविभूषितम्।
योनिरुत्स्विद्यते स्त्रीणामसतीनां मया श्रुतम्।
सा त्वं ध्रुवं ब्रूहि चैनां मम चेच्छसि जीवितम्।
एवमुक्ता सुदेष्णा तु शोकेनाभिप्रपीडिता।
अहो दुःखमहो कृच्छ्रमहो पापमिति स्म ह।
प्रारुदत्कृपणं दुःखार्ता विपाकं तस्य वीक्ष्य सा।
पातालेषु पतत्येष विलपन्बडवामुखे।
त्वत्कृते विनशिष्यन्ति भ्रातरः सुहृदश्च मे।
किं नु शक्यं मया कर्तुं यत्त्वमेवमभिप्लुतः।
न च श्रेयोऽभिजानीषे काममेवानुवर्तसे।
ध्रुवं गतायुस्त्वं पाप यदेवं काममोहितः।
अकर्तव्ये हि मां पापे वियुनङ्क्षि नराधम।
अपि चैतत्पुरा प्रोक्तं निपुणैर्मनुजोत्तमैः।
एकस्तु कुरुते पापं स्वजातिस्तेन हन्यते।
गतस्त्वं धर्मराजस्य विषयं नात्र संशयः।
अद्रूपकमिमं सर्वं स्वजनं घातयिष्यसि।
एवं तु मे त्वं स्वतर येनाह भ्रातृसौहृदात्।
विदितार्थां करिष्यामि तुष्टो भव कुलक्षयात्।
गच्छ शीघ्रमितस्त्वं हि स्वमेव भवनं शुभम्।

16

After 4. 15. 14, S ins.

द्रौपदी।
प्रजारक्षणशीलानां राज्ञां ह्यमिततेजसाम्।
कार्योऽनुपालनान्नित्यं धर्मे सत्ये च तिष्ठताम्।
स्वप्रजायां प्रजायां च विशेषं नाधिगच्छताम्।
प्रियेष्वपि च द्वेष्येषु समत्वं ये समाश्रिताः।
विवादेषु प्रवृत्तेषु समकार्यानुदर्शिनः।
राज्ञा धर्मासनस्थेन जितौ लोकावुभावपि।
राजन्धर्मासनस्थोऽसि रक्ष मां त्वमनागसीम्।
अहं त्वनपराध्यन्ती कीचकेन दुरात्मना।
पश्यतस्ते महाराज हता पादेन दासिवत्।
त्वत्समक्षं नरश्रेष्ठ निष्पिष्टा वसुधातले।
अनागसीं कृपार्हां मां स्त्रियं त्वं परिपालय।
रक्ष मां कीचकाद्भीतां धर्मं रक्ष नरेश्वर।
मत्स्याधिप प्रजा रक्ष पिता पुत्रानिवौरसान्।
यस्त्वधर्मेण कार्याणि मोहाद्वा कुरुते नृपः।
अचिरात्तं दुरात्मानं वशे कुर्वन्ति शत्रवः।
मत्स्यानां कुलजस्त्वं हि तेषां सत्यं परायणम्।
त्वं किलैवंविधो जातः कुले धर्मपरायणे।

तमाचष्ट, G1.3 तथाचष्ट. — (L. 12) M (except M4) महानतो (for मही°). — (L. 17) T1 G भास्कर° — (L. 18) T2 G3 M (except M4) बलाबल (for महद्बलम्) — (L. 20) T G2 दुन्त्वा, M5 कष्टा (for कृच्छ्रां) — (L. 21) T1 M (except M5) कर्त्रां, T2 G2 वल (for रुजं) T2 G2 दुर्वंशस्य (for कुलस्य च) — M om. lines 22–23 — (L. 22) T om. न — (L. 25) M1–3 °युत तथा — (L. 28) T1 भ्रातरं चैव मातुलं, M °रं वा यश(M4 5 मन)स्विन — (L. 29) M ना(M1.3 स्त्री)नाग° — (L. 30) T1 G1.3 °रत्लि-म्यते, T2 °रुन्द्विचते, G2 °रुद्रवते — After line 30, T1 G2 ins

मां निरीक्ष्यानुलिप्तान सर्वाभरणभूषितम्।
चक्षुर्नेष्यति सैरन्ध्री मन्मथेनाभिपीडिता।

— (L. 31) T दृष्टा, G1 द्रष्टु, G2.3 धृष्ट, M4 श्रुत (for ध्रुवं) G3 M1–3 5 वदस्व, M4 ब्रुवन्त (for ब्रूहि च) T2 G1 मम चेज्जीवितं प्रियं, M4 जीवितं मां यदीच्छसि, M5 मम चेदिच्छसि प्रियं — (L. 33) M ब्रुवन् (for स्म ह) — (L. 34) M transp तस्य and वीक्ष्य — (L. 35) T भवतो (for विलपन्) — (L. 42) T2 G M5 तु (for स्व-) — (L. 44) T G2 अदूषितम्, G1.3 अदुष्टकम्

16

(L. 1) M °शीलेन T2 G2 राज्ञाममित°, M राज्ञा ह्यमित-तेजसा — (L. 2) M तिष्ठता — (L. 3) M °गच्छता — (L. 4) M यः (for ये), and °श्रित (for °श्रिताः) — (L. 5) T1 G1 सम, T2 सम्यक् (for सम-) — (L. 10) M नृपश्रेष्ठ — (L. 14) T2 G1 M (except M4) नृप

अतस्त्वाहमभिक्रन्दे शरणार्थं नराधिप ।
त्राहि मामद्य राजेन्द्र कीचकात्पापपूरुषात् ।
अनाथामिति मा ज्ञात्वा कीचकः पुरुषाधमः ।
प्रहरत्येव नीचात्मा न च धर्ममवेक्षते ।
अकार्याणामनारम्भात्कार्याणामनुपालनात् ।
प्रजासु ये सुवृत्तास्ते स्वर्गमायान्ति भूमिपाः ।
कार्याकार्यविशेषज्ञाः कामकारेण पार्थिवाः ।
प्रजासु किंचिदपि कृत्वा नरकं यान्त्यधोमुखाः ।
नैव यज्ञैर्न वा दानैर्न गुरोरुपसेवनात् ।
प्राप्नुवन्ति तथा धर्मं यथा कार्यानुपालनात् ।
अपि चेदं पुरा ब्रह्मा प्रोवाचेन्द्राय पृच्छते ।
द्वन्द्वं कार्यमकार्यं च लोकेष्वासीत्परं यथा ।
धर्माधर्मौ पुनर्द्वन्द्वं विनियुक्तमथापि वा ।
क्रियायामक्रियायां च प्रापणे पुण्यपापयोः ।
प्रजाया सृज्यमानाया पुरा ह्येतदुदाहृतम् ।
एतद्धो मानुषाः सम्यक्कार्यं द्वन्द्वत्रयं भुवि ।
अस्मिन्सुनीते दुर्नीते लभते कर्मजं फलम् ।
कल्याणकारी कल्याणं पापकारी तु पापकम् ।
तेन गच्छन्ति ससंगं स्वर्गाय नरकाय वा ।
एवमुक्त्वा परं वाक्यं विससर्ज शतक्रतुम् ।
शक्रोऽप्यापृच्छ्य ब्रह्माणं देवराज्यमपालयत् ।
यथोक्तं देवदेवेन ब्रह्मणा परमेष्ठिना ।
तथा त्वमपि राजेन्द्र कार्याकार्ये स्थिरो भव ।

Colophon

वैशंपायन ।
एवं विलपमानायां पाञ्चाल्यां मत्स्यपुंगवः ।
अशक्तः कीचकं तत्र शासितुं बलदर्पितम् ।
विराटराजः सूतं तु सान्त्वेनैव न्यवारयत् ।
कीचकं मत्स्यराजेन कृतागसमनिन्दिता ।
नापराधानुरूपेण दण्डेन प्रतिपादितम् ।
पाञ्चालराजस्य सुता दृष्ट्वा सुरसुतोपमा ।
धर्मज्ञा व्यवहाराणां कीचकं कृतकिल्बिषम् ।
पुनः प्रोवाच राजानं स्मरन्ती धर्ममुत्तमम् ।
सम्प्रेक्ष्य च वरारोहा सर्वांस्तत्र सभासदः ।
विराटं चाह पाञ्चाली दुःखेनाविष्टचेतना ।

Then follow 4 15 21-27.

17

S ins after 4 15 33 (T_1, which hapl. om st. 33 and lines 1-8 of the foll passage, ins after 32).

श्रूयतां ते सुकेशान्ते मोक्षधर्माश्रया कथा ।
यथा धर्मः कुलस्त्रीणां दृष्टो धर्मानुरोधनात् ।
नास्ति यज्ञः स्त्रियः कश्चिन्न श्राद्धं नाप्युपोषणम् ।
या तु भर्तरि शुश्रूषा सा स्वर्गायाभिजायते ।
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्रस्तु स्थविरीभावे न स्त्री स्वातन्त्र्यमर्हति ।
अनुरुध्यमाना भर्तारं दृश्यन्ते वीरपत्नयः ।
शुश्रूषया क्रियमाणा पतिलोकं जयन्त्युत ।
भर्तृन्प्रति तथा पत्न्यो न कुप्यन्ति कदाचन ।
बहुभिश्च परिक्लेशैरविज्ञाताश्च शत्रुभिः ।
अनन्यभावशुश्रूषाः पतिलोकं जयन्त्युत ।
न क्रोधकालं नियतं पश्यन्ति पतयस्तव ।
न क्रुद्धान्प्रतियायाद्धि पतींस्ते वृत्रहा अपि ।
तेन त्वां नाभिधावन्ति गन्धर्वाः कामरूपिणः ।
यदि ते समयः कश्चित्कृतो ह्यायतलोचने ।
तं स्मरस्व क्षमाशीले क्षमा धर्मो ह्यनुत्तमः ।
क्षमा धर्मः क्षमा सत्यं क्षमा दानं क्षमा तपः ।
त्र्यशिनो द्वादशाङ्गस्य चतुर्विंशतिपर्वणः ।
कश्चित्षष्टिशतारस्य मासोनस्याक्षमी भवेत् ।
वैशंपायन ।
इत्येवमुक्ते तिष्ठन्तीं पुनरेवाह धर्मराट् ।

— (L 20) M_{1-3} मत्वा मां, $M_{4\ 5}$ मा मत्वा (for मां ज्ञात्वा) — (L. 23) $M_{1.\ 5}$ स्यु, $M_{2\ 3\ 4}$ (*sup lin* as in text) तु (for ते) — (L 26) M तपोदानैर् (for न वा दानैर्) — (L 28) M एतत् (for इदं) — (L 31) $G_{1.\ 3}$ क्रियाणामक्रियाणां च, M_{1-3} अक्रियाया क्रियाया च — (L 36) M निःसंग (for ससंगं) — After line 36, T G ins

सुकृतं दुष्कृतं वापि कृत्वा मोहेन मानवः ।
पश्चात्तापेन तप्येत स्वबुद्ध्या मरणं गतः ।

— (L. 38) T_1 G देवान्पालयते प्रभुः, T_2 देवान्प्रभुरपालयत् — (L 40) $G_{1\ 3}$ यतो (for स्थिरो) — Colophon *Adhy no* 18 — (L. 43) M °नैवाभ्यवारयत् — (L 46) M transp. पाञ्चाल° सुता and दृष्ट्वा — (L 47) M °हारस्य — After line 49, T G_2 ins

राजानुवर्तनपरान्कीचकं च कृतागसम् ।

17

Lines 5-6 = Manu 9 3 — Lines 7-8 = (var) 4 15 32 — (L 7) Hypermetric! T_2 G_2 आराध्य° (for अनु°). — $G_{1.\ 3}$ om line 8 — (L. 9) $M_{1\ 3}$ भीरु (M_2 भर्तुर्) भर्तृभयात्पत्न्यो, M_{3-5} (corrupt) भतृभीरुभयात्पत्न्यो — (L 10) T_1 $M_{1\ 2\ 5}$ अवशा°, G_3 परिशा° $G_{1.\ 3}$ बधुभि° (for शत्रुभि) — (L 11) G_1 M_1 परलोक, $M_{2\ 4}$ पुण्यलोक $G_{1\ 3}$ M (except M_3) व्रजति (for जयन्ति) — (L. 18) T_1 $G_{1.\ 3}$ त्रिंशिनो, T_2 M_2 न्यशिनो

18

After 4. 15 41, S (M_{2-5} om lines 13-19) ins.:

भ्रातुः प्रयच्छ त्वरिता जीवश्राद्धं तमद्य वै ।
सुदृष्टं कुरु चैवैनं नासून्मन्ये धरिष्यति ।
तेषां हि मम भर्तॄणां पञ्चानां धर्मचारिणाम् ।
एको दुर्मर्षणोऽस्त्यर्थं बले चाप्रतिमो भुवि ।
निर्मनुष्यमिमं लोकं कुर्यात्क्रुद्धो निशामिमाम् ।
न च संकुप्यते तावद्गन्धर्वः कामरूपधृक् ।
नूनं ज्ञास्यति यावद्धि ममैवं पादघातनम् ।
तत्क्षणात्कीचकं पापं सपुत्रभ्रातृबान्धवम् ।
विनशिष्यति दुष्टात्मा यथा दुष्कृतकर्मकृत् ।
अपि चैतत्पुरा प्रोक्तं निपुणैर्मनुजोत्तमैः ।
एकस्तु कुरुते पापं कालपाशवशं गतः ।
नीचो ह्यात्मापराधेन कुलं येन विनश्यति ।
सुदेष्णामेवमुक्त्वा तु सैरन्ध्री दुःखमोहिता ।
कीचकस्य वधार्थाय व्रतदीक्षामुपागमत् ।
अभ्यर्थिता च नारीभिर्मानिता च सुदेष्णया ।
न च स्नाति न चाश्नाति पांसूंश्च परिमार्जति ।
रुधिरक्लिन्नवसना बभूव मृदितेक्षणा ।
तां तथा शोकसंतप्तां दृष्ट्वा प्ररुरुदुः स्त्रियः ।
कीचकस्य वधं सर्वा मनोभिश्चाशशंसिरे ।

19

The foll. (addl.) adhy is ins after adhy 15 in S (except $M_{2,5}$, M_4 marg ins lines 1-3 here and the whole adhy after the end of this parvan)

जनमेजयः ।
अहो दुःखतरं प्राप्ता कीचकेन समाहृता ।
पतिव्रता महाभागा द्रौपदी योषितां वरा ।
दुःशालो मानयन्ती या भर्तॄणां भगिनीं शुभाम् ।
नाशयस्मिन्पुराजे सा बलात्कारेण वाहिता ।
किमर्थमिह संप्राप्ता कीचकेन दुरात्मना ।
नाशयच्च महाभागा कृष्णा पादेन ताडिता ।
तेजोराशिरिव देवी धर्मज्ञा सत्यवादिनी ।
केशपक्षे परामृष्टा मर्षयिष्यत्यशक्तवत् ।
नैतत्कारणमल्पं हि श्रोतुकामोऽस्मि सत्तम ।
कृष्णायास्तु परिक्लेशान्मनो मे दूयते भृशम् ।
कस्य वंशे समुद्भूतः स च दुर्ललितो मुने ।
बलोन्मत्तः कथं चासीत्स्यालो मात्स्यस्य कीचकः ।
दृष्ट्वापि तां प्रियां भार्यां सूतपुत्रेण ताडिताम् ।
नैव चुक्षुभिरे वीराः किमकुर्वन्त तं प्रति ।
वैशंपायनः ।
त्वदुक्तोऽयमनुप्रश्नः कुरूणां कीर्तिवर्धन ।
एतत्सर्वं यथा वक्ष्ये विस्तरेणेह पार्थिव ।
ब्राह्मण्यां क्षत्रियाज्जातः सूतो भवति पार्थिव ।
प्रातिलोम्येन जातानां स ह्येको द्विज एव तु ।
रथकारमितीमं हि क्रियायुक्तं द्विजन्मनाम् ।
क्षत्रियादवरो वैश्याद्विशिष्टमिति चक्षते ।
सह सूतेन संबन्धः कृतः पूर्वं नराधिपैः ।
तेन तु प्रातिलोम्येन राजशब्दो न लभ्यते ।
तेषां तु सूतविषयः सूतानां नामतः कृतः ।
उपजीव्य च यत्क्षत्रं लब्धं सूतेन वै पुरा ।
सूतानामधिपो राजा केकयो नाम विश्रुतः ।
राजकन्यासमुद्भूतः सारथ्येऽनुपमोऽभवत् ।
पुत्रास्तस्य कुरुश्रेष्ठ मालव्यां जज्ञिरे तदा ।
कीचका इति विख्याताः शतं षट् चैव भारत ।
तेषामासीद्बलश्रेष्ठः कीचकः सर्वजित्प्रभो ।
अग्रजो बलसमत्तस्तेनासीत्सूतपदक्षतम् ।
मालव्या एव कौरव्य तत्र ह्यवरजाभवत् ।
तस्यां केकयराजस्तु सुदेष्णा दुहिताभवत् ।
तां विराटस्य मात्स्यस्य केकयः प्रददौ मुदा ।
सुरथायां मृतायां तु कौसल्यां श्वेतमातरि ।
श्वेते विनष्टे शङ्खे च गते मातुलवेश्मनि ।
सुदेष्णां महिषीं लब्ध्वा राजा दुःखमपानुदत् ।
उत्तरं चोत्तरां चैव विराटात्पृथिवीपते ।
सुदेष्णा सुषुवे देवी कैकेयी कुलवृद्धये ।
मातृष्वसृसुतां राजन्कीचकस्तामनिन्दिताम् ।
सदा परिचरन्प्रीत्या विराटे न्यवसत्सुखी ।

18

(L. 2) M (except M_1) न म (for नासून्) — (L. 12) T $G_{1,2}$ तेन (for येन) — (L. 17) T_1 G_1 °क्लिन्नवदना G_1 °व मदिरेक्षणा, G_2 °पांसुदिग्धे°, G_3 °व मदिते°, M_1 °व रुधिरोक्षिता — (L. 18) T_2 प्राक्रन्दिता, G_2 प्राक्रन्दुः, M_1 प्ररुदिता — (L. 19) $G_{1,3}$ °श्च शशंसिरे, G_2 °श्चाशशंसिरे

19

After the prior half of line 2, $G_{1,3}$ read the posterior half of line 6, then lines 7-8, 3-5 and the prior half of line 6, followed by the posterior half of line 2 — In G_3 lines 7-8 are repeated. — (L. 9) Cf. 1 56 4^{ab} $G_{1,3}$ M_1 कृतपूर्वो $G_{1,3}$ निशां स्मृत, $M_{1,4}$ नरेश्वरै° (for नरा°) — (L. 22) Om. in $G_{1,3}$ $M_{1,4}$ तथापि तैर्महीपालै(M_4 °र्नरव्याघ्र) — (L. 24) Om. in G_2 T_2 $G_{1,3}$ क्षेत्र, and राजन् (for लब्ध). — (L. 25) Om in G_2 $M_{1,4}$ कीचको (for केकयो). — (L. 28) Om in $M_{1,4}$ — (L. 29) T G_2 अपि (for आसीद्) G_1 कुलश्रेष्ठ, G_3 बल श्रेष्ठ, M_4 बल श्रेष्ठ M_1 तेषामतिबलो ज्येष्ठ — (L. 31) M_1 द्वितीयाया तु मालव्यां (for

भ्रातरश्चास्य विक्रान्ता सर्वे च तमनुव्रता ।
विराटस्यैव सहृष्टा वल कोश च वर्धयन् ।
कालेया नाम दैतेया प्रायशो भुवि विश्रुता· ।
जज्ञिरे कीचका राजन्याणो ज्येष्ठस्ततोऽभवत् ।
स हि सर्वास्त्रसपन्नो वलवान्भीमविक्रम ।
कीचको नष्टमर्यादो वभूव भयदो नृणाम् ।
त प्राप्य वलसमत्त विराट पृथिवीपति ।
जिगाय सर्वांश्च रिपून्यथेन्द्रो दानवान्पुरा ।
मेखलाश्च त्रिगर्तांश्च दशार्णांश्च कशेरुकान् ।
मालवान्यवनांश्चैव पुलिन्दान्काशिकोसलान् ।
अङ्गान्वङ्गान्कलिङ्गांश्च तङ्गणान्परतङ्गणान् ।
करदाश्च निषिद्धाश्च शिवान्मच्छिल्लिकास्तथा ।
अन्ये च वहव शूरा नानाजनपदेश्वरा· ।
कीचकेन रणे भग्ना व्यद्रवन्त दिशो दश ।
तमेव वीर्यसपन्न नानायुतसम वले ।
विराटस्तत्र सेनायाश्चकार पतिमात्मन ।
विराटभ्रातरश्चैव दश दाशरथोपमा ।
ते चैनानन्ववर्तन्त कीचकान्वलवत्तरान् ।
एवविधवलो भीम कीचकास्ते च तद्विधा ।
राज्ञ· स्याला महात्मानो विराटस्य हितैषिण ।
एतत्ते कथित सर्वं कीचकस्य पराक्रमम् ।
द्रौपदी न शशापैन यस्मात्तद्वदत श‍ृणु ।
विक्षरन्ति तप क्रोधादपयो न शपन्ति च ।
जानन्ती तद्यथातत्त्व द्रौपदी न शशाप तम् ।
क्षमा धर्मः क्षमा दानं क्षमा यज्ञ· क्षमा यशः ।
क्षमा सत्य क्षमा शील क्षमा कीर्ति क्षमा परम् ।
क्षमा पुण्य क्षमा तीर्थं क्षमा सर्वमिति श्रुति. ।
क्षमावतामयं लोक. परश्चैव क्षमावताम् ।
एवत्सर्वं विजानन्ती सा क्षमामन्वपद्यत ।
भर्तृणा मतमाज्ञाय क्षमिणा धर्मचारिणाम् ।
नाशपत्त विशालाक्षी सती शक्तापि भारत ।
पाण्डवाश्चापि ते सर्वे द्रौपदी प्रेक्ष्य दु·खिताम् ।
क्रोधाग्निना व्यदह्यन्त तदा लज्जाव्यपेक्षया ।
अथ भीमो महाबाहु· सूदयिष्यस्तु कीचकम् ।
वारितो धर्मपुत्रेण वेलयेव महोदधि ।
सधार्य मनसा रोप दिवारात्र विनि.श्वसन् ।
महानसे तदा कृच्छ्रात्सुष्वाप रजनीं च ताम् ।

Colophon.

20

After 4 17 19, T_1 ins

सहस्र वालखिल्यानां सहस्रमुदवासिनाम् ।
सहस्रमश्मकुट्टाना सहस्र वायुभोजिनाम् ।
सहस्र भुवि पत्नीना सहस्र ब्रह्मचारिणाम् ।
सहस्र वानप्रस्थानां सहस्र गृहमेधिनाम् ।
हंसा परमहसाश्च योगिनश्च द्विजातय· ।
कुटीचका· परिव्राजो ये चान्ये वनचारिण. ।
नित्य भक्तात्मकाश्चैव वहवश्चोर्ध्वरेतस ।
चतुर्वेदविदो विप्रा शिक्षामीमासयो. स्थिरा. ।
पदक्रमपरा विप्रा सामाध्ययनिकाश्च ये ।

21

B Dn $D_{4-7\ 9-12}$ ins after 4 20 24[ab] (B_3, after 4 20 22) K_2 D_8, after 4 20 24

अथ मा तत्र कैकेयी प्रेपयत्प्रेपणेन तु ।
तेनैव चोदिता पूर्वं भ्रातृप्रियचिकीर्पया ।
सुरामानय सैरन्ध्रि कीचकस्य निवेशनात् ।
सूतपुत्रस्तु मा दृष्ट्वा महत्सान्त्वमवर्तयत् ।
सान्त्वे प्रतिहते क्रुद्ध परामर्शमनाभवत् ।
विदित्वा तस्य सकल्पं कीचकस्य दुरात्मन ।
तथाह राजशरण जवेनैव प्रधाविता ।
सदर्शने तु मा राज्ञ. सूतपुत्र परामृशत् ।
पातयित्वा तु दुष्टात्मा पदाहं तेन ताडिता ।
प्रेक्षते स्म विराटस्तु कङ्कश्च वहवो जना ।

the prior half) $M_{1.4}$ चित्रा (for तत्र) — (L 32) $M_{1.4}$ तां सुदष्णेति वै प्राहुर्विराटमहिर्षी प्रियां — (L. 33) $M_{1.4}$ कीचक (for केकय) — After line 51, $M_{1\ 4}$ ins

मल्दान्निपधाश्चैव तुण्टिकेरांश्च कोङ्कणान् ।

— (L. 52) T G_2 किरातान् (for करदान्) T_1 M_1 मल्लि-रिकान्, T_2 G_2 मल्लिल्लिकान् G_1 शिथिलान्मल्लकांस्तथा — (L. 55) M_1 °युतवल रणे — (L. 63) T_2 G_2 रक्षति च, $M_{1.3}$ क्षरन्तीति $G_{1.3}$ नाशयति (for न शपन्ति) — (L. 64) M_1 पांचाली (for द्रौपदी) — G_1 om line 66 $M_{1\ 4}$ om. the posterior half of line 66 and the prior half of line 67 — (L 72) $G_{1.3}$ $M_{1\ 4}$ दु·खिता — (L 73) M_4 काल° (for लज्जा°) — Colophon *Adhy no* 20.

21

— (L. 1) B $D_{4.6}$ Cr प्रेपयत्, D_8 अप्रेपीत् B (except B_3) Dn $D_{4\ 11.12}$ Cr प्रणयेन (for प्रेप°) — (L. 2) $D_{6\ 7}$ तया (for तेन) K_2 $D_{4\ 7-9}$ नोदिता, B_4 प्रेपिता, Dn D_{10-12} देशिता $D_{7\ 9}$ तूर्णं, D_{10} पूर्व Dn_2 $D_{8\ 10\ 11}$ भ्रातु· (for भ्रातृ-) — (L 3) Dn $D_{5\ 11\ 12}$ कल्याणि, a few MSS सैरिन्ध्रि K_2 निकेतनात् — (L 5) Cv क्रुद्ध (as above), Cvp क्षुद्र· — (L 6) D_6 त भाव (for सकल्प), and महा° (for दुरा°) — (L. 7) B_4 राजसदन, Cs as above. — (L. 9) B_4 D_4 वाधिता (for ताडिता) K_2 पदा तेनैव वाधिता, D_6 स तदा मां पदावधीत् — (L. 10) K_2 वीक्षते K_2 B_3 $D_{6\ 10}$ स (for स्म) B_2 ततो वीक्ष्य, B_4 तत्प्रेक्षको;

रथिन: पीठमर्दाश्च हस्त्यारोहाश्च नैगमा: ।
उपालब्धो मया राजा कङ्कश्चापि पुन: पुन: ।
ततो न वारितो राजा न तस्याविनय: कृत: ।
योऽयं राज्ञो विराटस्य कीचको नाम सारथि: ।
त्यक्तधर्मा नृशंसश्च वरस्त्री सतत: प्रिय: ।
शूरोऽभिमानी पापात्मा सर्वार्थेषु च मुग्धवान् ।
दारामर्शी महाभाग लभतेऽर्थान्बहूनपि ।
हरेदपि च वित्तानि परेषां क्रोशतामपि ।

Thereafter D_3 *repeats* 24cd

22

After 4.21.6, D_3 ins.:

अथ ज्ञात्वा विराटोऽपि कृष्णामस्य तु कीचकम् ।
अब्रवीत्स प्रतीहारं द्रुतमेव आनय कीचकम् ।
प्रहित: स विराटेन द्वा:स्थ: कीचकमन्दिरम् ।
गत्वा तमब्रवीत्सूत मत्स्यस्त्वां द्रष्टुमिच्छति ।
कीचकोऽपि नृपादेशान्मत्स्यस्य भवनं ययौ ।
उवाच मत्स्यराजस्य प्रणिपत्य प्रविश्य च ।
आगतोऽहं महाराज विराट वचनात्तव ।
वदस्व यदि वक्तव्यं श्रुत्वा यास्यामि वै गृहम् ।
विराट उवाच ।
कलत्रे वाथ वा मित्रे भृत्ये राज्ञि यथापि वा ।
निवेदितं सुखे दु:खे सुखं भवति कीचक ।
त्वमेव शरणं मह्यं राज्यं च त्वत्प्रसादत: ।
मत्वा त्वापि ममैव त्वं तेन त्वां प्रतिपेदिरे ।
पश्याम्यहर्निशं दुर्गं विपरीतं तु मण्डलम् ।
सधूमं ज्वलनं मन्ये वैमनस्यं च वाजिनाम् ।
शृणोमि च दिवा घोरामशिवां प्रतिभाषिणीम् ।
रात्रौ बलिभुज: संघांश्च सूर्यस्य मण्डलम् ।
अन्यच्च सम्प्रभाषन्ते दैवज्ञा मम कीचक ।
मम द्वादशग: सौरिर्जन्मर्क्षे तव कीचक ।
पश्यामि हर्म्यपतनं कीचक भ्रातृरूपं विना ।
जानाम्येतैर्महोत्पातैर्युगान्तप्रतिमं रणम् ।
मृत्युस्ते भविता तथ्यमथ वा मम कीचक ।
शृणोमि वीर सैरन्ध्र्या: शृणु साहसकारिण: ।
गन्धर्वा: पतय: पञ्च सन्ति देवेन्द्रवल्लभा: ।
मुनिना केनचिच्छप्ताश्चरन्तीमां वसुंधराम् ।
रक्षमाणाश्च सैरन्ध्रीं भार्यां स्वीयां पतिव्रताम् ।
तेषां तु भार्यां त्वं वत्स सैरन्ध्रीं कर्तुमिच्छसि ।
न च शक्ता त्वया भोक्तुमेषा गन्धर्वरक्षिता ।
त्वं वातीव कामार्त: कार्यमेतन्न बुध्यसे ।
विद्युत्पातैरिमै: सौम्य मर्तव्यं भवता ध्रुवम् ।
कान्या चैवंविधा नारी चरेद्वै क्षितिमण्डले ।
विना सैरन्ध्रीं भद्रं ते त्यज गन्धर्वरक्षिताम् ।
वृद्धो वा यदि वा स्वामी यदि वा भगिनीपति: ।
राजा पूज्य: सदा मान्य: कर्तव्यं वचनं मम ।
कैकेयपुत्र तन्नाम्ना त्यज सैरन्ध्रिजां कथाम् ।
कुलैषा महती भाति रूपेणातीव कीचक ।
त्यक्त्वा कामं सैरन्ध्र्या त्वं मदीयां ध्वजिनीं भवान् ।
नृपालयस्व विश्रब्धो मद्राज्यात्कैकयात्मज ।
कीचक उवाच ।
सर्वथा भवदीयं मे कर्तव्यं वचनं तथा ।
तथाप्येषा मयावश्यं भोक्तव्या तनुमध्यमा ।
सैरन्ध्री यदि मे पार्श्वे स्थिता स्नेहेन भामिनी ।
शेते न शयने मत्स्य तदा मन्ये मृतं स्वयम् ।
याचते मां स्पृश कामं सैरन्ध्र्यर्थं नराधिप ।
जीवितं तृणवत्त्यक्त्वा भोक्तव्या हि मया शुभा ।
न लोकमपि गन्धर्वा मयि शक्ता विशां पते ।
वैशंपायन: ।
स मन्मथार्तो नृपतिं गतस्तु
त्यक्त्वा तु वाक्यं नृपतेर्नरेन्द्र ।
संयोगमिच्छन्द्रुपदात्मजाया:
संधायमानो विदितं स मृत्युम् ।

Colophon (*adhy. no.* 22)

23

After 4.21.49, N ins.:

कीचकानां तु मुख्यस्य नराणामुत्तमस्य च ।
अन्योन्यमभिसंरब्धौ परस्परवधैषिणौ ।
वालिसुग्रीवयोर्भ्रात्रो: पुरेव कपिसिंहयो: ।
तत: समुद्यम्य भुजौ पञ्चशीर्षाविवोरगौ ।
नखदंष्ट्राभिरन्योन्यं घ्नत: क्रोधविषोद्धतौ ।

$D_{7.9}$ त्वप्रेक्षत (for प्रेक्षते स्म) Some MSS (incl. Dn) तु (for च) D_3 प्रेक्षतस्तु विराटस्य D_5 प्राक्रोशन् (for कङ्कश्च) — (L. 13) K_2 D_3 ततो न, $D_{7.9}$ न तेन (for ततो न) K_2 D_{5-10} Ca.r विनय:, B_3 नियम: (for अविनय:) — (L. 15) K_2 $B_{1.3}$ Dn $D_{5.8.10}$ °धर्मो K_2 न नस्य सतत: Cn analyses नर्त्वासतत (cf. Cs) — (L. 16) K_2 शूरोऽवमानी, B_1 $D_{3.10}$ शूरो मानी च, B_5 D_2 शूराभिमानी K_2 अपि मौनवान्, B_2 च लोभवान्, B_4 D_5 च मुख्यवान्, $D_{7.9}$ तथा धने (for च मुग्धवान्) Cr cites लोभवान्, Crp (Dev.) मुख्यवान्, Ca.c.s.rp मुग्धवान् — (L. 17) K_2 दारानथा; $D_{4m.7}$ दारान्दर्पान्, some MSS °मर्षी — (L. 18) K_2 $D_{8.10}$ उद्धरेदपि, Dn $D_{11.12}$ आहरेदपि (for हरेदपि च)

23

Lines 2 and 3 are transp. in B_4 Dn $D_{8.11.12}$ — (L. 2) Om. in D_8. B (except B_2) $D_{2.10-12}$ °न्यमपि संरब्धौ, $D_{1.8}$ °न्य नयसंरम्भात्, D_4 °न्य तौ सुसंरब्धौ, $D_{7.9}$ °न्यमभिसंरम्भात् K $B_{1.5}$ Dn D_5 (m as above) $_{11.12}$ °वधै° (for °वधै°) — (L. 3) $D_{1.8.7.9}$ पुरा वा नरसिंहयो:,

25

After line 3 of 448* (cf v. l. 4 21 58), T G2 ins

मद्दतोत्प्लुत्य वेगेन कीचकोरसि वीर्यवान्।
जानुभ्यां ताडयामास सोऽपि पादौ प्रगृह्य च।
भ्रामयामास वेगेन ताडयामास च क्षितौ।
भीमोऽपि लाघवात्पादौ मोचयित्वोरुविक्रम.।
उत्प्लुत्य सोर्ध्वमपतत्कीचकस्य शिरोपरि।
केशे गृहीत्वा चाकृष्य विचकर्ष स सर्वत ।
हस्तौ गृहीत्वा भीमस्य कीचको बलगर्वित ।
मोचयित्वा केशपक्षं गले जग्राह पाण्डवम्।
गृहीतकण्ठावन्योन्यं पातयामासतू रणे।
हुंकारफूत्कृतोच्छ्वासौ मार्जाराविव कोपितौ।
कीचकोपरि कौन्तेय कौन्तेयोपरि कीचक.।
अन्योन्यं पातयित्वैव मुहूर्तं सूतपाण्डवौ।
पुनरुत्थाय तौ वीरावन्योन्यं बाहुशालिनौ।
बाहुयुद्धमयुध्येतामुपतापप्रकोपितौ।
पादाभ्यां चैव जानुभ्यां मुष्टिभ्यां च परस्परम्।
एवं तयो प्रहरतोर्भीमकीचकयोस्तदा।
स्वन. समभवद्गात्रौ विस्फूर्जितमिवाशने ।
लब्ध्वान्तरमथो भीम पाणिभ्यां कीचकं बली।
हीयमानं समुद्वीक्ष्य प्रभज्जालिङ्ग्य मध्यत ।
उत्तानं पातयित्वैनं पादाभ्यामुरसि स्थित ।
संमृज्य पाणिना पांसु दक्षिणेन दृढाकृति.।
मुष्टिं गृहीत्वा वेगेन शिरस्यभिजघान ह।
मुष्टिघातेन तेनासौ निर्यज्जिह्वाक्षितारक ।
विसृजन्मलमूत्रे च क्रोशन्महिषवत्स्वरम्।

26

After 4 22 26, T G2 ins

मा खिदस्व याज्ञसेनि पातिव्रत्यव्रते स्थिता।
पातिव्रत्यस्थिता नारी प्रव रक्षेत्सदात्मन ।
पुरा स्त्री देवरातस्य पतिव्रीता शिरोमणि ।
कदाचिद्भर्तृरूपेण रक्षसापहृता सती।
कस्यचित्सरसस्तीरे वा निवेश्य स राक्षस ।
तद्भर्तृरूपं सत्यज्य रक्षो भूत्वा सुदारुणम्।
साम्ना दानेन भेदेन सा यदा नान्वमन्यत।
तदा ता पातयित्वा स मैथुनायोपचक्रमे।
तत सा धैर्यमास्थाय विवरं न ददौ तदा।
तत. स खड्गमुत्कृष्य भीषयामास ता सतीम्।
साभिसत्क्तभया साध्वी प्राणत्यागे सुनिश्चिता।
प्रतिज्ञामकरोत्कृष्णे पतिव्रतपरायणा।
आराधितो यदि मया भर्ता मे दैवतं महत्।
कर्मणा मनसा वाचा गुरवस्तोषिता मया।
तेन सत्येन योनिर्मे भवत्वद्य शिला दृढा।
एव तया प्रतिज्ञाते तद्योनि सा शिलाभवत्।
अन्तरा नाभिजान्वोर्यत्तत्सर्वं च शिलाभवत्।
तत स खड्गमुत्कृष्य वेगेनास्या. शिरोऽहरत्।
जया नाम सखी साभूत्पार्वत्या नखमांसवत्।
तस्मात्पतिव्रतायाश्च तु खमत्य सुख बहु।

27

S ins after 4. 28 14 (G1 M3, which om. st. 13–14, ins after 12)

वैशंपायन ।
ततो दुर्योधनो वाक्यं श्रुत्वा तेषां महात्मनाम्।
मुहूर्तमिव संचिन्त्य सचिवानिदमब्रवीत्।
श्रुतं ह्येतन्मया पूर्वं कथासु जनसंसदि।
धीराणां शास्त्रविदुषां प्राज्ञानां मतिनिश्चये।
कृतीनां सारफल्गुत्वे जानामि नयचक्षुषा।
सत्त्वे बाहुबले धैर्ये प्राणे शारीरसंभवे।
सांप्रतं मानुषे लोके सदैत्यनरराक्षसे।
चत्वारस्तु नरव्याघ्रा बले शक्रोपमा भुवि।
उत्तमा प्राणिनां तेषां नास्ति कश्चिद्बले सम ।
समप्राणबला नित्यं संपूर्णबलपौरुषा ।
बलदेवश्च भीमश्च मद्रराजश्च वीर्यवान्।
चतुर्थ कीचकस्तेषां पञ्चमं नानुशुश्रुम ।
अन्योन्यानन्तरबला. परस्परजयैषिण.।
बाहुयुद्धमभीप्सन्तो नित्यं संरब्धमानसा ।
तेनाहमवगच्छामि प्रत्ययेन वृकोदरम्।
मनस्यभिनिविष्टं मे व्यक्तं जीवन्ति पाण्डवा ।

सौख्यं प्राप्स्यामि परम (for the prior half) — (L. 15) Ś1 K क्रोधमनाथ°. — (L. 17) B1 Dn D11.12 उद्धृतनेत्र, D3 8 विर्न्नत° — (L. 18) B2 विष्पिष्य, D5 निघृष्य B (except B1) Dn D1.9 11 12 °पुट (B1 °पुटौ) बली, D3 °बलीयसा. — After line 18, D5 *repeats* line 10 — After line 18, B1 *ins*

अभ्याहनन्महाराज पदाघातैश्च दारुणै ।

— After line 19, D5 *ins*

अभ्याहनन्महाबाहु पादाष्ठीलै सुदारुणै ।

(a v l. of the previous insertion)

27

After वैश°, T1 ins .

भीष्मद्रोणकृपैस्तैः कर्णदुःशासनादिभि ।

— (L 4) T1 G वीराणां (for धीराणां) T1 G1.3 शस्त्र° (for शास्त्र°) — (L. 5) T2 G2 °फल्गुत्व — (L. 12) T1

तत्राहं कीचकं मन्ये भीमसेनेन मारितम् ।
सैरन्ध्रीं द्रौपदीं मन्ये नात्र कार्या विचारणा ।
शङ्के कृष्णानिमित्तं तु भीमसेनेन कीचकः ।
गन्धर्वव्यपदेशेन हतो निशि महाबलः ।
को हि शक्तोऽपरो भीमात्कीचकं हन्तुमोजसा ।
शस्त्रं विना बाहुवीर्यात्तथा सर्वाङ्गचूर्णितम् ।
संविष्टं वा तथा शीघ्रं चर्ममांसास्थिचूर्णितम् ।
रूपमन्यत्समास्थाय भीमस्यैतद्विचेष्टितम् ।
ध्रुवं कृष्णानिमित्तं तु भीमसेनेन सूतजः ।
गन्धर्वव्यपदेशेन हतो निशि न संशयः ।
पितामहेन ये चोक्ता देशस्य च जनस्य च ।
गुणास्ते मत्स्यराष्ट्रेषु बहुशोऽपि मया श्रुताः ।
विराटनगरे मन्ये पाण्डवाश्छन्नचारिणः ।
निवसन्ति पुरे रम्ये तत्र यात्रा विधीयताम् ।
मत्स्यराष्ट्रं गमिष्यामो ग्रहीष्यामश्च गोधनम् ।
गृहीते गोधने नूनं तेऽपि योत्स्यन्ति पाण्डवाः ।
अपूर्णे समये चापि यदि पश्याम पाण्डवान् ।
द्वादशान्यानि वर्षाणि प्रवेक्ष्यन्ति पुनर्वनम् ।
तस्मादन्यतरेणापि लाभोऽस्माकं भविष्यति ।
कोशवृद्धिरिहास्माकं शत्रूणां निधनं भवेत् ।
कथं सुयोधनं गच्छेद्युधिष्ठिरस्तथा पुरा ।
एवमपि यद्वलेपं मात्स्यः परिभवान्मयि ।
तस्मात्कर्तव्यमेवेह सैन्ययात्रा विधीयताम् ।
एतत्सुनीतं मन्येऽहं सर्वेषां यदि रोचते ।

28

After 4. 29. 19, D_4(marg.) $_5$(on suppl. fol.) $_9$(marg.) ins.:

दुर्योधन उवाच ।
उक्तमेतद्विधेयं वा वाक्यमुक्तं त्वयानघ ।
यदैव चारैः प्रहितैरिहागम्य निवेदितम् ।
निधनं सूतपुत्रस्य कीचकस्य बलीयसः ।
तदैव हि ममाचिन्ता हृदि पाण्डुसुतान्प्रति ।
कीचकं सहसैवं नान्यो हन्ता वृकोदरात् ।
नियमेन हि पार्थानां विराटं प्रियमिच्छति ।
संग्रामे चापि विश्वस्ता निवासाय स्थिता ध्रुवम् ।
पितामहेन यच्चोक्तं राष्ट्रं पार्थनिवेशने ।
तद्धि राज्ञो विराटस्य धूर्तं विषये स्थितम् ।
तत्तत्र गत्वा कर्णाशु विराटं गोधनं नृपम् ।
गृहीष्यामस्य राष्ट्रं च प्रसभं स्वयमेव तु ।
अनुयास्यन्ति ते चापि विराटस्य हितैषिणः ।
तत्र तेऽस्माभिः शत्रवः सुप्ता वैरं यथागतम् ।
अपूर्णसमयान्भूयो वनाय गमयामहे ।
इत्यपि चैतान्सर्वान्मम भोक्ष्याम मेदिनीम् ।
अल्पावशिष्टः कालोऽयं समयश्च विभाति मे ।
उद्योजयाम सैन्यानि श्रोभूते गमनं प्रति ।
कर्ण उवाच ।
यदि तत्र गतास्ते पार्था भवेयू राजसत्तम ।
शिष्टं घोषयज्ञं तस्मात्तथापि खलु साम्प्रतम् ।
निग्रहार्थं विराटस्य पाण्डवानां प्रबोधनम् ।
दीनास्ते कोशहीनाश्च वनवासेन कर्शिताः ।
सुखेन हन्तुमर्हन्ति अथ प्रव्राजनाय वै ।

29

After 4. 30. 3, 8 ins.:

ततः शब्दो महानासीद्वेणुश्च दिवमस्पृशत् ।
शङ्खदुन्दुभिनिर्घोषो भेरीणां च महास्वनः ।
गजाश्वरथनागानां नराणां च पदातिनाम् ।
एवं ते सर्वमभिनिर्याय मत्स्यराजस्य गोधने ।
त्रिगर्तैर्गृह्यमाणे तु गोपालाः प्रत्यषेधयन् ।
अथ त्रिगर्ताः सहसा परिगृह्य धनं बहु ।
परिक्षिप्य हयैः शीघ्रं रथव्रातैश्च भारत ।
गोपालान्प्रत्ययुध्यन्त रणे कृत्वा जये धृतिम् ।
ते हन्यमाना बहुभिः प्रासतोमरपाणिभिः ।

M (except M_4) °शुश्रुम. — (L. 17) T G_2 पातितं (for मारितम्). — (L. 20) M_2 न संशयः (for महा°). — $G_{1.2}$ om. line 23. — (L. 24) M समानेतुं (for समास्थाय). T G_2 तथा भीमस्य चेष्टितं (for the posterior half). — (L. 25) T_1 कीचकः, $G_{1.2}$ कीचका, $M_{1.2.5}$ सूतजाः. — (L. 26) T_1 $M_{1.2.5}$ हता (for हतो). T_2 G_2 शुचि (for निशि). — (L. 28) T G_2 मात्स्य°, M °राष्ट्रस्य (M_5 °राष्ट्रेषु). — (L. 31) T $M_{1.4.5}$ सुनि° (for गमि°). — (L. 33) T_2 G_2 M_4 पश्येम. — (L. 38) G_1 °स्तु; G_2 °स्तत, M_2 °स्ता (for °स्त). $G_{1.2}$ पुनः (for पुरा). — (L. 39) G M_5 तत्र (for तस्मि)

28

Cf. the previous passage (No. 27), which is similar in sense. Here are the v. l. of D_9. — (L. 1) युक्तमुक्तं हि राधेय भाष्यमेतत्त्वयानघ. — (L. 13) यथास्थितं यथागति (for the posterior half). — (L. 23) सुखसाध्या भविष्यति पाण्डवा इति मे मतिः.

29

(L. 2) G_1 घोषश्च, $M_{1.2}$ निर्घोषा, M_3 घोषाश्च. M_{1-3} °स्वनाः. M om. line 3. — (L. 9) T_1 G_3 $M_{1.2.5}$ रथिभिः (for बहुभिः). T_1 G_3 M शक्तिभिः प्रासपाणि(T_1 G_3 °धारि)भिः. — (L. 14) T_2 G_3 गोपान्विद्रावयन्गे, $G_{1.2}$ गोपालान्द्रावयन्गे,

गोपाला गोकुले मत्ता वारयामासुरोजसा ।
परश्वधैश्च मुसलैर्भिण्डिपालैश्च मुद्गरैः ।
गोपाला कर्पणैश्चित्रैर्जघ्नुरश्वान्समन्ततः ।
ते हन्यमानाः संक्रुद्धास्त्रिगर्ता रथयोधिनः ।
विसृज्य शरवर्षाणि गोपानभ्यद्रावयन्रणे ।
ततो युवानः सभीताः भ्रमन्तो रेणुगुण्ठिताः ।

30

After 4. 31. 19, D_4 ins.:

अयुध्यन्त रणे वीराः शूराः परिघबाहवः ।
कबन्धाः समरे हन्तुं महायोधाः प्रचक्रमुः ।
हन्यतां हन्यतामेव शिरांसि पतितान्यपि ।
कबन्धान्प्रेरयामासुर्हुंकारोच्चारणादिभिः ।
विराटश्च महाश्चर्यं दृष्ट्वा कौतुकमागतम् ।
हर्षं लेभे परं राजा समाप्त्येवविधा नराः ।
कबन्धेन शतं योधाः पातिता रणमूर्धनि ।
ततः कबन्धः पतितः पुष्पवर्षैः सहैव तु ।
विमानं प्रेरितं देवैरप्सरोभिः समावृतम् ।
समक्षं सर्वयोधानां तत्रारूढो दिवं ययौ ।
न शेकुरिति संक्रुद्धाः शूराः कर्तुं पराङ्मुखान् ।

This is followed by 11–14, 578*, 582*, 20, 21 etc.

31

After 4. 32. 21, Dn D_5 (on suppl. fol.) $_{7.8.11.12}$ ins.

वैशंपायन उवाच ।
एवमुक्तस्तु वेगेन भीमसेनो महाबलः ।
गृहीत्वा तु धनुःश्रेष्ठं जवेन सुमहाजवः ।
विमुञ्चञ्शरवर्षाणि सतोय इव तोयदः ।
तं भीमो भीमकर्माणं सुशर्माणमथाद्रवत् ।
विराटः समवीक्ष्यैनं तिष्ठ तिष्ठेति चावदत् ।
सुशर्मा चिन्तयामास कालान्तकयमोपमम् ।
तिष्ठ तिष्ठेति भाषन्तं पृष्ठतो रथपुंगवः ।
पश्यता सुमहत्कर्म महद्युद्धमुपस्थितम् ।
परावृत्तो धनुर्गृह्य सुशर्मा भ्रातृभिः सह ।
निमेषान्तरमात्रेण भीमसेनेन ते रथाः ।
पातिता भीमसेनेन विराटस्य समीपतः ।
रथानां च गजानां च वाजिनां च ससादिनाम् ।
सहस्रशतसंघाता शूराणामुग्रधन्विनाम् ।
पत्तयो निहतास्तेषां गदां गृह्य महात्मना ।
तद्दृष्ट्वा तादृशं युद्धं सुशर्मा युद्धदुर्मदः ।
चिन्तयामास मनसा किंशेषं हि बलस्य मे ।
अपरो दृश्यते सैन्ये पुरा मग्नो महाबले ।
आकर्णपूर्णेन तदा धनुषा प्रत्यदृश्यत ।
सुशर्मा सायकांस्तीक्ष्णान्क्षिपते च पुनः पुनः ।

32

Ś1 K ins. after 604* (for sequence see below) B D, after 4. 32. 35^{ab}

विराटस्य महात्मानं परिक्लेशविनाशनाः ।
स्थिताः समक्षं ते सर्वे स्वयं भीमोऽभ्यभाषत ।
नायं पापसमाचारो मत्तो जीवितुमर्हति ।
किं तु शक्यं मया कर्तुं यद्राजा सततं घृणी ।
गले गृहीत्वा राजानमानीय विवशं वशम् ।

M निकुञ्जेषु निशा यते (M5 गोपालानभ्यवर्तत). — After line 14, T1 ins.

हन्यमानेषु गोपेषु निकुञ्जेषु निशा यते ।

— (L. 15) Om. in G1 M1.2. T1 G3 रेणुकुण्ठिता, T2 G2 °गुण्ठिता

31

Of the comm. only Cn.s comment on some of these lines (Cn on lines 7–8, 10, 16–18; Cs on lines 5, 16) — D_5 om. line 2 — (L. 3) Dn2 $D_{7.8}$ विमुञ्चन् — (L. 4) $D_{5.7.8}$ अभिद्र° (for अथाद्र°) — (L. 5) $D_{5.7.8}$ विराटमभिसंवीक्ष्य D_5 चाब्रवीत्, $D_{7.8}$ चाब्रवत् — (L. 7) $D_{5.7.8}$ भाषमाणा (for भाषन्तं), and ददृशे (for the posterior half) — (L. 13) After line 10, $D_{5.8.11.12}$ read line 13 $D_{5.7.8}$ संघाताः (for संघाता) D_5 सुनाराचसुधन्विनाम्, D_7 °णां च सुधन्वि° — (L. 17) $D_{5.7.8}$ अथ सम्यक् सैन्येषु पुरा मग्ने तथा बले — (L. 19) $D_{5.7}$ क्षिपेत् (for क्षिपते).

32

The sequence of the lines in Ś1 K (which om. altogether lines 2–4, 11–12) is as follows Ś1 6, 5, 7–10, 13–21, (lines 33^{ab}, 34, 35^{ab} of text), 1, 22–23, (line 35^{cd} of text), K 6, 5, 7–10, 13–21, (stanzas 33–34 of text), 22, (line 35^{ab} of text), 1, (line 35^{cd} of text) These transpositions and omissions are mostly ignored in the foll. notes — (L. 1) Om. in D_4. K महाराजा, Dn2 $D_{11.12}$ महाराज — (L. 2) B2 D_5 भीमसेनोऽब्रवीदिदं (for the posterior half) D_4 त्वया ज्ञात्वा भीम स चोवाच महाबलः; Ccp rp प्राह भीमो महाबाहुरिदं वचनमर्थवत्, Crp (Cat.) as above. After line 2, B3 ins. a line which is given as a v. l. in Ccp.rp for line 2 — (L. 5) $B_{1.2.5}$ D_6 Cc rp (Cat.) भीमो, Cr गले (as above) D_3 श्रेणयन् (for राजानम्). Dn2 $D_{4.11.12}$ आनयामास चैव हि, D_1 अवशं स्ववशे तत, D_3 अवशं पाण्डुरठित — (L. 6) Ś1 K

तत एन विचेष्टन्त बद्ध्वा पार्थो वृकोदर ।
रथमारोपयामास विसंज्ञ पांसुगुण्ठितम् ।
अभ्येत्य रणमध्यस्थमभ्यगच्छद्युधिष्ठिरम् ।
दर्शयामास भीमस्तु तामवस्था सुशर्मण. ।
प्रोवाच पुरुषव्याघ्रो भीममाहवशोभिनम् ।
त राजा प्राहसद्दृष्ट्वा मुच्यता वै नराधम ।
एवमुक्तोऽब्रवीद्भीम सुशर्माण महाबलम् ।
जीवितु चेच्छसे मूढ हेतु ते वदत शृणु ।
दासोऽस्मीति त्वया वाच्य समस्तु च सभासु च ।
एव ते जीवित दद्यामेष युद्धजितो विधिः ।
तमुवाच ततो ज्येष्ठो भ्राता सप्रणय वच· ।
मुञ्चेममधमाचार प्रमाण यदि ते वयम् ।
दासभाव गतो ह्येष विराटस्य महीपते ।
अदासो गच्छ मुक्तोऽसि मैव कार्षी. पुन· क्वचित् ।
एवमुक्ते तु सव्रीड सुशर्मासीदधोमुखः ।
स मुक्तोऽभ्येत्य राजानमभिवाद्य प्रतस्थिवान् ।
प्रमुच्य च सुशर्माण पाण्डवास्ते हतद्विष ।
स्वबाहुबलसपन्ना ह्रीनिषेवा यतव्रता· ।

☞ This is a badly fitting *replica* of a scene at the end of the Jayadratha vimokṣaṇa in the Āraṇyaka (cf B 3 272 7-24), from which another short passage has been utilized by the interpolator earlier in the course of this parvan (cf v l. 4 15 6). — Lines 22–23 are a *variant* of 4 32 34^{cd}–35^{ab}, a sure sign of interpolation!

33

After 4 32 47^{ab}, S ins.

पुनरेव विराटश्च राजा कङ्कमभाषत ।
अहो शूद्रस्य कर्माणि वल्लस्य द्विजोत्तम ।
सोऽह शूद्रेण सग्रामे वल्लेनाभिरक्षितः ।
त्वत्कृते सर्वमेवैतदुपपन्न ममानघ ।
वर वृणीष्व भद्र ते ब्रूहि कि करवाणि ते ।
ददानि ते महाप्रीत्या रत्नान्युच्चावचान्यपि ।
शयनासनयानानि कन्याश्च समलकृता· ।
हस्त्यश्वरथमधाश्च राष्ट्राणि विविधानि च ।
तथैव च मम प्रीत्या प्रतिगृह्ण ममान्तिके ।
वैशपायन ।
त तथा वादिन तत्र कौरव्य प्रत्यभाषत ।
एषैव तु मम प्रीतिर्यत्त्व मुक्तोऽसि शत्रुभि ।
प्रतीतश्चेत्पुनस्तुष्ट प्रवेक्ष्यामि तवानघ ।
दारै पुत्रैश्च मच्छिष्य मा हि प्रीतिर्ममातुला ।
सुशर्माण तु राजेन्द्र सभृत्यबलवाहनम् ।
विसर्जय नरश्रेष्ठ वरमेतदह वृणे ।
एवमुक्तस्तु कङ्केन विराटो राजसत्तम ।
प्रत्युवाच तत कङ्क सुशर्मा यातु चेष्टत· ।

34

After 624* (cf v l 4 34 12), G$_1$ ins.·

एतेन वै सारथिना तदार्जुन.
स देवगन्धर्वमहोरगासुरान् ।

प्र(Ś$_1$ स)कामभयपीडित (for the posterior half) — (L. 7) D$_{1-3}$ विवश (for विसंज्ञ) — (L 8) Ś$_1$ K कृत्वा त रथमध्यस्थ Cr cites अभ्येत्य — (L 9) D$_7$ (before corr) $_9$ तदावस्थां Ś$_1$ K B$_{1\ 5}$ Dn D$_{11\ 12}$ सुशर्माण नराधिप (for the posterior half) — (L 10) Some MSS व्याघ्र Ś$_1$ उवाच च ततो भीम, K D$_6$ तमुवाच ततो ज्येष्ठो Ś$_1$ K$_1$ मुचामु वै महाबल, K$_2$ मुच मुच महाबल — (L 11) D$_6$ त्रिगर्त (for त राजा) B$_8$ D$_{1-6,\ 10}$ प्राहसन्, B$_4$ D$_8$ प्राहसन् D$_2$ आह (for दृष्ट्वा) D$_8$ Cv नराधिप — (L. 12) Om in Ś$_1$ K B$_2$ Dn D$_{1,\ 3\ 4\ 10-12}$ D$_{5\ 7-9}$ ततो भीमोऽब्रवी मूढं (D$_8$ °भीद्वाक्य) त्रिगर्तानां नराधिप — After line 12, D$_2$ (marg) ins

उवाच पुरुषव्याघ्र नृपस्य वचने रत· ।

— (L. 13) Ś$_1$ जीव चेदिच्छसे मूढ, K$_2$ (corrupt) जीवितु मिच्छसि चेन्मूढ, D$_{4\ 7}$ (m as above) $_9$ जीवमिच्छसि चे मूढ Ś$_1$ मे (for ते) B$_2$ Dn$_1$ D$_{1\ 2\ 4\ 5\ 10}$ गदत (for वदत) — (L. 14) Ś$_1$ K सदा (for त्वया) — (L 16) Ś$_1$ K तदा (for ततो), and भ्राता भीम महाबल Ca cites सप्रणय — (L 17) Om in B$_2$ Dn$_1$ मुंच मुच, D$_{4,\ 7-10}$ मुच्चैनम् B$_8$ Dn$_1$ D$_{4-7\ 9}$ Ca.c rp (Cat) प्रमाणा , Cr cp as above — (L. 19) Dn$_1$ D$_8$ कदाचन (for पुन क्वचित्) — After line 19, Dn$_1$ alone ins a colophon, followed by वैश° उ°, which is copied by most of the printed editions! — (L. 20) Ś$_1$ K B$_5$ D$_6$ उक्तस्तु, D$_{1\ 2}$ स उक्त , D$_3$ स मुक्त (for उक्ते तु) Ś$_1$ K तूष्णीं किंचिदधोमुख — (L. 22) Om in D$_4$ Ś$_1$ Dn$_1$ विसृज्य तु, B$_{1\ 3\ 5}$ Dn$_2$ D$_{6\ 10-12}$ अवमुच्य, D$_{5\ 7\ 9}$ प्रमुच्याथ — After line 22, D$_6$ *repeats* line 1 K B$_{2\ 4}$ D$_{1-5\ 7-10}$ om line 23, which is itself a *repetition* (with v l) of 35^{ab}

33

(L. 2) G$_1$ शूद्रस्य (for शूद्रस्य) — (L 6) M$_5$ ददामि — (L. 9) G$_{1\ 3}$ M$_5$ एतानि च, M$_4$ (*sup lin* as in text) सर्वमेव (for तथैव च) — (L. 12) M$_{1-3}$ प्रविशाय परतप (for the posterior half) — (L 15) M$_{1-3}$ नृप° (for नर°)

सर्वाणि भूतान्यजयत्स वीर्यवान्
अतर्पयच्चापि हिरण्यरेतसम् ।
यदस्य सख्यामपि तस्य सयुगे
जानामि वीर्यं परवीर्यमथ्यग ।
सगृह्य रश्मीनपि वार्य वीर्यवान्
आदाय चाप प्रययौ रथे स्थित ।
न सर्वभूतानि न देवदानवा
न चापि सर्वे कुरव समागता ।
धन हरेयुस्तव जातु धन्विनो
बृहन्नला तूत्तरसारथिर्यदि ।

35

After 4 36 40, D4 ins the foll passage, of which D5 ins, at the same point, lines 2–3 only

प्रगृह्यैतद्धन सर्वं मुञ्च मा त्व बृहन्नडे ।
आरनालेन जीविष्ये न मे गोभि प्रयोजनम् ।
जीवन्प्राप्स्यामि गा ह्यन्या निवर्तस्व बृहन्नडे ।
अर्जुन उवाच ।
यशो हि कल्पान्तदशैकसाक्षि
न जीवित कुञ्जरकर्णलोलम् ।
क्षितिपालसूनो भव रङ्गमध्ये
उन्नामहे सगररङ्गभङ्गात् ।
उत्तर उवाच ।
या कीर्तिरुत्सर्पति देहनाशे
विन्दुसदा मूलविनाशिनीं ताम् ।
विक्रीय देह द्रविणेन को नु
मात्राकृत देवकुले करोति ।

36

T1 ins after 4 37 10ab G3 (which om 10–11), after 4 37 9

ये जेतारो महीपानाममुना बहवो हता ।
यस्मिंस्तेजो महत्कृत्स्नं निर्भरोच्छ्वसित भवेत् ।
येन मे दक्षिणा दत्ता बद्ध्वा द्रुपदमोजसा ।
विद्ध्वा वियद्गत लक्ष्य विनिर्जित्य च पार्थिवान् ।
निर्जितानेन पाञ्चाली पुरानेन स्वयवरे ।
खाण्डवे येन सतृप्तो वह्निर्जित्वा सुरासुरान् ।
परिणीता सुभद्रा च येन निर्जित्य यादवान् ।
निर्जितो येन युद्धेन त्रिपुरारि स्मरार्दन ।
गत्वा त्रिविष्टप येन जितेन्द्रा दानवा युधि ।
निवातकवचा राजन्दानवाना त्रिकोटय ।
निर्जिता कालकेयाश्च हिरण्यपुरवासिन ।
येन त्व मोचितो बद्धश्चित्रसेनेन तद्वने ।
येन गत्वोत्तर मेरोरानिनाय महद्धनम् ।
याजितो धर्मसूनुश्च नृपान्सर्वान्विजित्य च ।
यस्मिञ्शौर्यं च वीर्यं च तेजो धैर्यं पराक्रम ।
औदार्यं चैव गाम्भीर्यं ह्री श्रीर्धर्मो दयार्जवम् ।
एवमादिगुणोपेत सोऽय पार्थो न सशय ।

37

After 4 39 19, S (which om. st 20) ins

माता मम पृथा नाम तेन मा पार्थमब्रुवन् ।
देवदानवगन्धर्वान्पिशाचोरगराक्षसान् ।
अह पुरा रणे जित्वा खाण्डवेऽग्निमतर्पयम् ।
हुताशन तर्पयित्वा सहित शार्ङ्गधन्वना ।
त्रिविष्टपगतो दृष्ट्वा पितामहमहेश्वरौ ।
मूर्च्छया पतित भूमावागतौ देवसत्तमौ ।
दृष्ट्वा तौ वरदौ देवौ सज्ञा लब्ध्वोत्थित पुन ।
मूर्ध्नाभिप्रणत भूमौ तौ तदा वरदौ वरौ ।
कृष्णेत्येकादश नाम प्रीत्या मे तत्र चक्रतु ।
तुष्टौ च मम वीर्येण कर्मणा चाभिराधितौ ।
सर्वदेवै परिवृतौ भूयो मा स्वयमूचतु ।
वर तात वृणीष्वेति यत्प्रार्थयसि पाण्डव ।
ततोऽहमस्त्राण्यलभ दिव्यानि च दृढानि च ।
ब्राह्म पाशुपत चैव स्थूणाकर्णं च दुर्जयम् ।
ऐन्द्र वारुणमाग्नेय वायव्यमथ वैष्णवम् ।
ततोऽहमजय भूयो रथेनैन्द्रेण दुर्जयान् ।
मातलिं सारथिं कृत्वा निवातकवचाग्रणे ।
अवध्यकवचान्देवैर्वरदत्तान्महासुरान् ।
तिस्र कोटीर्दानवाना सयुगेष्वनिवर्तिनाम् ।
एको निर्जित्य संग्रामे भूयो देवानतोषयम् ।
ततो मे भगवानिन्द्र किरीटमददात्स्वयम् ।
देवाश्च शङ्खमददु शत्रुसैन्यनिवारणम् ।
अह पारे समुद्रस्य हिरण्यपुरवासिनाम् ।

35

(L. 2) C3 cites आरनाल

37

(L. 7) G1 लब्ध्वेत्ति, M4 °स्थित — (L 8) M1–3 अभि° प्रणत, M4 मूर्ध्ना निपतितौ — (L 10) M1 2 4 (*sup lin* as above) चार्चितौपितौ, M3 °नदितौ — (L. 12) T1 G य (for यत्) — (L. 18) T1 G सर्वान्हत्वा महारथान् (*for the posterior half*) — (L 20) M समरे (for संग्रामे) — (L. 21) T1 G प्रददात् (for अददात्) — (L. 22) T1 G M3 (*sup lin* as above) °विद्रा° (for °निवा°) — (L. 23)=(var) 4. 56 11ab M2.4

हत्वा पष्टिसहस्राणि जय सग्रामयानहम् ।
असम्भ्रान्तो रथे तिष्ठन्सहयेषु समेषु च ।
शत्रुमध्ये दुराधर्षा न मुह्यन्ति च मे दिशः ।
अह गन्धर्वराजेन ह्रियमाण सुयोधनम् ।
भ्रातृभि सहित तात गन्धर्वं समरे जितम् ।
चतुर्दश सहस्राणि हत्वा चैनममोचयम् ।
मा भैर्विगतसन्त्रास. कुरूनेतान्समागतान् ।
सुयोधनस्य मिषत कर्णस्य च कृपस्य च ।
पितामहस्य भीष्मस्य द्रोणद्रौणस्य च स्वयम् ।
सर्वानेव कुरुश्रेष्ठ प्रतानेष्यामि ते पशून् ।

Colophon

38

After 4 39 23, D3 ins

न शार्तव्य त्वया वीर लोकपालसमो ह्यसि ।
प्रसादये महाबाहो पूर्वं यदस्खलित मम ।
तावन्मेऽभूद्भय पार्थ यावत्त्वां नावलोकये ।
विभयो दर्शनात्तुभ्य कस्त्वां योद्धुमिजिगीषिषु ।
एव प्रहृष्टरोमाणं सूते मत्स्यसुतोऽर्जुनम् ।
प्राञ्जलि. समुपातिष्ठद्ब्रह्मयो द्रुहिण यथा ।
ततोऽर्जुन· समाश्वास्य मत्स्य वैराटिमब्रवीत् ।
उवाच मुदित काले समो हत्वा यथा रविः ।
आश्वास्य पुत्र मत्स्यस्य धनुर्विस्फार्य गाण्डिवम् ।
प्रेक्षणीयतमो भूत्वा तस्थौ दीप्तो रविर्यथा ।

39

After 4 40 27, N (D1 missing) ins

उत्तर उवाच ।

एकस्त्व पाण्डवश्रेष्ठ बहूनेतान्महारथान् ।
कथ जेष्यसि सग्रामे सर्वशास्त्रास्त्रपारगान् ।
अशक्तोऽस्मि कौन्तेय सगहायाश्च कौरवाः ।
अत एव महाबाहो ...िक्षिष्यामि तेऽग्रत ।

वैशम्पायन उवाच ।

उवाच पार्थो मा भैषी. प्रहस्य स्वनवत्तदा ।
युध्यमानस्य मे वीर ... महाबले ।
सहायो घोषयात्रायां गन्धर्वैस्सह ... मम ।
तथा प्रतिभये ... ...यक्षानतम ... ।
गाण्डवे युध्यमानस्य ... ...सीत् मम ।
निवातकवचै. सार्धं पौलोमैश्च महाबलै ।
युध्यतो ... पार्थ ... महायन्ततागतन् ।
स्वयवरे तु पाञ्चाल्या राजभि सह सयुगे ।
युध्यतो बहुभिस्तात क महायन्ताभवत् ।
उपजीव्य गुरु द्रोणं शक्र वैश्रवण यमम् ।
वरुण पावक चैव कृप कृष्ण च माधवम् ।
पिनाकपाणिन चैव कस्मैताप योधये ।
रथ वाहय मे शीघ्र व्येतु ते मानसो ज्वर ।

10

This passage of 27 lines, which has been placed by oversight in this App, is only a part of the full adhy (4 43 10–20), which was wrongly copied here by the scribe of B3 and subsequently omitted by him in its proper place The passage, which is ins after 4 42 28 begins with पार्थताड्य दास्यामि (cf 4 43 10[a]) and ends with अथ पश्यन्तु कौरवा (= 4 43 20[d]), followed by a repetition of 4 42 28 It needs only to be noted that the passage contains 822*, and 826*, but not 823* (a Southern stanza which is found interpolated in some N MSS, including B1)

(sup lin as above) °पुरमाद्र — (L. 24) Cf 4 56 11[cd] T1 G विजय प्राप्तवानपि — (L. 25) M3 5 समेषु विषमेषु च (for the posterior half) — (L. 26) M4 आपतत्सु (for शत्रुमध्ये) — After line 29, T1 ins

मन्त्रामकथन कीर्ति प्राप्यान्यैश्च प्रकीर्तिताम् ।
एतानि मम नामानि योऽन्यश्चहनि कीर्तयेत् ।
त न पश्यन्ति रक्षासि न त निघ्नन्ति शत्रव ।
अथ पश्य महाबाहो मम वीर्यं सुदु सहम् ।

— (L 30) M4 वृक्षा (for एतान्) — Colophon *Adhy no* S 42 (M3 4 41)

39

Of the comm only Cr cites स्वयवरे from line 12 — (L. 1) Ś1 K कथम् (for बहून्) — (L. 2) K बहून् (for कथ) K समेत्य, Dn3 D4 0 जेष्यामि Ś1 समेत्य पार्थ सग्रामे Ś1 K स ... (Ś1 °त्र)स्थितान् — (L. 3) Ś1 K कौरव्य (for कौन्तेय), and महाबाहो वी° — (L. 4) D3 अत एव हि ...ष्यामि वीर पार्थ तवाग्रत — (L. 5) K धीमान्, D3 जिष्णुर् (for पार्थो) K कौन्तेय (for मा भैषी) — (L. 7) Ś1 K D3 9 सखे मम; D3 सहायता — D3 reads lines 8–9 after line 11 — (L. 9) B3 अपार्, B3 m D5–7 2 अगात् (for आसीत्) B3 6 D5 4–7 9 10 सहायता (for मता मम) Ś1 K D5 6 सहायस्तदाभवत् — K1 reads lines 10–11 after 13 — (L. 14) Ś1 K °ण्य त्वो रुद्र — Ś1 K2 B1 (om the second line) ins after line 15 D1 5 7 9 (all om the second line), after line 16 K1, after line 17

समामाप न वार्ष्णेय योगानामीश्वर प्रभुम् ।
कृष्ण च देवकीपुत्र न भीतोऽस्मुपयास्यति ।

41

Before 4. 45. 1 (that is, after adhy. 44), S ins.:

वैशंपायनः।
कृपस्य तु वचः श्रुत्वा कर्णो राजन्युधां पतिः।
पुनः प्रोवाच संक्रुद्धो गर्हयन्ब्राह्मणं कृपम्।
लक्षयाम्यहमाचार्य मयाद्यक्ते गतं रिपौ।
जीवेन हि न योद्धव्यमहं योत्स्ये धनंजयम्।
ननु वारुणमाग्नेयं याम्यं वायव्यमेव च।
अस्त्रं ब्रह्मशिरश्चैव सत्त्वहीनस्य ते वृथा।
मित्रकार्यं कृतमिदं पितापुत्रैर्महार्थं।
भर्तृपिण्डश्च निर्दिष्टो यथेष्टं गन्तुमर्हथ।
भिक्षां हरस्व त्वं नित्यं यज्ञानुचरस्य च।
आमन्त्रणं हि भुङ्क्ष्वाथ मास्मान्युद्धेन भीषय।
मार्गणास्त्रं मया मुक्तं निर्दहेत्पृथिवीमिमाम्।
किं पुनः पाण्डुपुत्राणामेकमर्जुनमाहवे।
आगमिष्यन्ति पदवीं मत्वा पाण्डवमाश्रिताः।
तानहं निहनिष्यामि भवता गम्यतां गृहम्।
तस्य तद्वचनं श्रुत्वा अश्वत्थामा प्रतापवान्।
उवाच वदतां श्रेष्ठो दुर्योधनमवेक्ष्य च।
ततश्छेत्स्यामि खड्गेन शिरस्ते ब्राह्मणाधम।
वैशंपायन उवाच।
एवमुक्ते तु वचने कर्णेनामित्रसूदन।
अश्वत्थामा ततो राजन्खड्गं जग्राह चर्म च।
गृहीत्वा विमलं खड्गं चर्म चादाय सुप्रभम्।
दुद्राव योद्धुं तं कर्णं सिंहः क्षुद्रमृगं यथा।
तस्मिन्गृहीते खड्गे तु कर्णोऽपि रथिनां वरः।
उत्ततार रथात्तूर्णं गृह्णन्खड्गं स वीर्यवान्।
ततस्तौ तु महावीर्यौ धृतखड्गौ युद्धदुर्मदौ।
अन्योन्यस्य वधं प्रेप्सू सिंहाविव मदोत्कटौ।
तौ दृष्ट्वा सुमहावीर्यौ युद्धाय समवस्थितौ।
दुर्योधनस्ततस्तूर्णं रथादुत्तीर्य वेगवान्।
अभिगम्य गुरोः पुत्रमश्वत्थामानमब्रवीत्।
अश्वत्थामन्गुरोः पुत्र क्षम्यतां द्विजसत्तम।
कर्णो वक्तुं न जानाति ब्राह्मणश्चातिकोपनः।
त्वयि संनिहितो भारो युद्धस्यास्य विनिश्चयः।
स तथाभिहितो राजन्राज्ञा चैव निवारितः।
स्वरथं प्राप्य तूर्णं वै न च किंचिदुवाच ह।
कर्णोऽपि स्वं रथं तूर्णमारुरोह नृपाज्ञया।

42

After 4. 45. 26, D_1 ins.:

कर्ण उवाच।
सदैव द्रोणपुत्रोऽयं पापात्मा पापपौरुषः।
किमत्र कार्यं पार्थेन कथं वा स प्रशस्यते।
अन्यत्र कामान्मोहाद्वा लोभाद्वाल्यात्तु केवलात्।
प्रशंसति दुरात्मानं पाण्डवं पापपौरुषम्।
मां चापि निन्दते नित्यं द्विषतस्यैव काम्यया।
तस्मादयं सुदुर्बुद्धिः पश्यतां मम पौरुषम्।
अश्वत्थामोवाच।
वाक्शूरा ब्राह्मणाः प्रोक्ता बाहुशूराश्च क्षत्रियाः।
धनुषा चार्जुनः शूरः कर्णः शूरो मनोरथैः।
कर्ण उवाच।
सदा भीषयते सर्वां वाहिनीं ब्राह्मणो गुरुः।
प्रीत्या च पाण्डुपुत्राणां दर्शयन्नहितं तव।
सदा च वायवो वान्ति नित्यं वर्षति वासवः।
अर्जुनं समरे जित्वा लब्ध्वा च विजयं महत्।

43

After 4. 48. 23, S ins.:

ततः स समरे वीरो बीभत्सुः शत्रुपूगहा।
गोपालाश्चोदयामास गाश्चैताश्चोदयेति च।
उत्तरं चाह बीभत्सुर्हर्षयन्पाण्डुनन्दन।
गवामग्रं समीक्षस्व गाश्चैवाशु निवर्तय।
यावदेते निवर्तन्ते कुरवो व्यवमास्थिताः।
यास्युत्तरेण गाश्चैताः सैन्यानां च नृपात्मज।
पश्यन्तु कुरवः सर्वे मम वीर्यपराक्रमम्।
ते लाभमिव मन्वानाः कुरवोऽर्जुनमाहवे।
दृष्ट्वा यान्तमदूरस्थं क्षिप्रमभ्यपतन्रथैः।
हस्त्यश्वरथवीरेण महतातिविराजता।
योधैः प्रासासिहस्तैश्च चापबाणोद्यतायुधैः।
तान्यनीकान्यदृश्यन्त कुरूणामाततायिनाम्।
सम्पतन्त इवाकाशे विद्युत्वन्तो बलाहकाः।
तानि दृष्ट्वा ह्यनीकानि निवर्तितरथानि च।
पार्थोऽपि वायुवद्घोरः सैन्याग्रं व्यधुनोच्छरैः।

41

(L. 2) M संरब्धो (for संक्रुद्धो). — (L. 8) M (except M_1) निर्दिष्टो (for निर्दिष्टो). — (L. 10) M आमन्त्रणानि (for °णं हि). — After line 14, T ins.:

[illegible]

42

(L. 2–3) = (var.) 4. 42. 25. — (L. 11) = 4. 42. 24ab.

43

(L. 1) T_2 वीरो, M शूरो (for वीरो). — (L. 2) T_2 M गाश्चोदयति च (for the posterior half). — (L. 10) T_1 $G_{1,3}$ [illegible] — M om. line 14. — (L. 15) T_1 $G_{1,3}$ [illegible]

11

After [illegible] 20, all MSS except Ś1 K D1 [illegible] ins

[illegible] सहसा किरीटी
[illegible] शरमानिलस्य ।
[illegible]
[illegible] विपक्ष ।
[illegible] धनुर्धराणां
[illegible] ।
कर्णस्य पार्थस्य निशम्य युद्ध
[illegible] कुरवोऽभितस्थु ।
स [illegible] कोप
[illegible] कर्णं [illegible] ।
[illegible] साश्वं सरथं ससारथिं
[illegible] घोरशरौघवृष्ट्या ।
[illegible] सरथा सनागा
योधा [illegible] णाम् ।
[illegible] भीष्ममुखाः महाश्चा
किरीटिना कीर्णरथाः पृषत्कैः ।
स चापि तानर्जुनबाहुमुक्ता-
ञ्शराञ्शरौघैः प्रतिहत्य कर्णः ।
तस्थौ महात्मा सधनुः सबाणः
सविस्फुलिङ्गोऽग्निरिवाशु कर्णः ।
ततस्तु जज्ञे तलतालशब्दः
सशङ्खभेरीपणवप्रणादः ।
प्रक्ष्वेडितज्यातलनिस्वनं स
वैकर्तनं पूजयतां कुरूणाम् ।
उद्धूतलाङ्गूलमहापताकं
ध्वजोत्तमं साकुलभीषयन्तम् ।
गाण्डीवनिर्ह्रादकृतप्रणादं
किरीटिनं प्रेक्ष्य ननाद कर्णः ।
स चापि वैकर्तनमर्दयित्वा
साश्वं ससूतं सरथं पृषत्कैः ।
तमाववर्षं प्रसभं किरीटी
पितामहं द्रोणकृपौ च दृष्ट्वा ।
